PADMASUNDARA'S

# JÑĀNACANDRODAYANĀṬAKA

L. D. SERIES 81

GENERAL EDITORS

DALSUKH MALVANIA

NAGIN J. SHAH

EDITED BY

NAGIN J. SHAH

L. D. INSTITUTE OF INDOLOGY AHMEDABAD 9

Jain Education International For Private & Personal Use Only www.jainelibrary.org

PADMASUNDARA'S

# JÑĀNACANDRODAYANĀṬAKA

L. D. SERIES 81

GENERAL EDITORS
DALSUKH MALVANIA
NAGIN J. SHAH

*EDITED BY*
NAGIN J. SHAH

L. D. INSTITUTE OF INDOLOGY AHMEDABAD 9.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Printed by

**Mahanth Tribhuvandas Shastri**
Shree Ramanand Printing Press
Kankaria Road
Ahmedabad-380022.

Published by

**Nagin J. Shah**
Director,
L. D. Institute of Indology
Ahmedabad-380009.

FIRST EDITION

April 1981

PRICE RUPEES 8/-

Revised
Price Rs. 10 Rs 15
L. D. Indology

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# PREFACE

The L. D. Institute of Indology has great pleasure in publishing Padmasundara's *Jñānacandrodayanāṭaka*, a work on Jaina philosophy exclusively written in Sanskrit verses, which was first printed in our Journal Sambodhi Volume 6 Nos. 1-2 and is now being issued separately in book-form. For the book, a verse-index is prepared and added to the text.

It is hoped that the publication of this work will be of interest to the students of Jaina philosophy.

L. D. Institute of Indology,
Ahmedabad-380009.
2nd April, 1981.

**Nagin J. Shah**
Director

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# INTRODUCTION

The present edition of the *Jñānacandrodayanāṭaka*, the work hitherto unpublished, is prepared on the basis of the paper ms. belonging to the Sāgaragaccha Jaina Bhaṇḍāra preserved in the Hemacandrācārya Jñānamandir, Patan. The ms. bears the No. 7382. Its size is 30 cms x 12 cms. It consists of 24 folios. Each folio has 12 lines per side and 45 letters per line. The script is good. There is no colophon at the end. But there occurs the name of the scribe at the end. His name was Meghā. *(Meghālikhitam.)* The ms. is copied in c. 1700 V. S. It is in good condition.

The work is entitled *Jñānacandrodayanāṭaka*. But in the last verse the author calls it *vyāyoga*. It is divided into Five Acts (*Aṅkas*). We find remarks 'praviśati' and 'niṣkrānta' to mark the beginning or end of a particular topic. Though the author suggests that Bandha (Bondage) etc. are characters, he has not personified them. There is no dialogue. So, this work is not a drama. It is simply a work on Jaina philosophy exclusively written in Sanskrit verses. It consists of 398 verses. The author has employed various metres.

The author of the present work is Padmasundara. In the last verse occurring at the end of the work the author tells us that Padmasundara, a pupil of Padmameru who again is a pupil of Ānandameru, has composed Jñānacandrodaya Vyāyoga. Harṣakirti who flourished in this line after Padmasundara informs us that Padmasundara was honoured by Emperor Akbar just as Ānandārya (=Ānandameru) had been honoured by Emperors Babar and Humayu. In his *Dhātutaraṅgiṇī* Harṣakirti further tells us that Padmasundara was honoured by Māladeva of Jodhpur and that he defeated a Pundit at the court of Emperor Akbar. When in 1582 A.D. Hīravijayasūri visited Akbar's court Padmasundara was no more and his books lying with Prince Salim were handed over to Hīravijayasūri who established a Bhaṇḍāra with them at Agra. It is beyond doubt that Padmasundara was a great scholar. He wrote *Akabaraśāhiśṛṅgāradarpaṇa*[1] (a work on Kāvyaśāstra), *Hāyanasundara* (a work on Astrology), *Pramāṇasundara*[2] (a work on Logic), *Sundaraprakāśaśabdārṇava* (a Lexicon), *Yadusundaramahākāvya*, *Pārśvanāthamahākāvya* and *Rāyamallābhyudayamahākāvya*.

1 Published in Ganga Oriental Series, Bikaner.

2 Included in *Jaina Philosophical Tracts* published in L. D. Series, No. 41.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

In the seventeenth century of Vikrama Era there flourished a great Digambara personality, Banārasīdāsa who was transformed into a saint-poet by Kundakunda's works. Kundakunda's mysticism touched his heart. He derived spiritual inspiration from Kundakunda's powerful mystic words. He composed several works expounding *Niścaya-naya*. Somewhat earlier in the 16 th century V. S. Up. Harṣavardhana wrote his Adhyātmabindu[1]. He closely followed Kundakunda's *Samayasāra* in ideas and expressions as well. Though he was a Śvetāmbara monk, he studied Kundakunda's works and Amṛtacandra's commentaries thereon. In Padmasundara we find another Śvetāmbara monk contemporary of Banārasīdāsa, who was very much influenced by the mystic philosophy of Kundakunda. Thus we have two strong evidences of the study of Kundakunda's works in the Śvetāmbara circles in the Middle Ages. In our own days, Shrīmad Rājacandra, Śvetāmbara by birth, turned out to be a true follower of the mystic philosophy of Kundakunda. His severe penances coupled with ascetic wisdom point to the fact that he had certainly realised the ideal which Kundakunda advocated and preached in his works.

As we have already stated, Padmasundara was influenced by the works of Kundakunda. In a way, the Jñānacandrodayanāṭaka embodies the essence of the philosophy contained in Kundakunda's works. Throughout the work he closely follows Kundakunda and his commentator Amṛtacandra. Some verses are almost identical, in expressions, with the gāthās and ślokas from the Pravacanasāra and the Ātmakhyātiṭīkā on the Samayasāra. At many places he has versified the passages of the Tattvadīpikāṭīkā on the Pravacanasāra. He has bodily borrowed the phrases from the works of Kundakunda and Amṛtacandra. In foot-notes I have noted down all the verses that strike comparison with the verses and passages from the works of Kundakunda and Amṛtacandra. Some instances are given below :

| *Jñānacandrodaya* | *Pravacanasāra* |
|---|---|
| न मनो नाहं देहो न चापि वाणी कारणं तेषाम् । कर्ता न न कारयिता कर्तॄणां नानुमन्ताऽस्मि ॥ (५.६२) | णाहं देहो ण मणो ण चेव वाणी ण कारणं तेसिं । कत्ता ण ण कारयिदा अणुमंता णेव कत्तीणं ॥ (२.६८) |
| पुद्गलमयो न चाहं मया न ते पुद्गलाः कृताः पिण्डम् । देहोऽहं न च तस्मादथ कर्ता तस्य देहस्य ॥ (५.६३) | णाहं पोग्गलमइओ ण ते मया पोग्गला कया पिंडं । तम्हा हि ण देहोऽहं कत्ता वा तस्स देहस्स ॥ (२.६९) |
| *Jñānacandrodaya* | *Ātmakhyāti* |
| अज्ञानप्रविजृम्भणेन तमसा रज्जौ भुजङ्गभ्रमस्त्वज्ञानेन मरीचिकासु हरिणा धावन्ति पाथोधिया । अज्ञानेन विमोहितैकमनसां | अज्ञानान्मृगतृष्णिकां जलधिया धावन्ति पातुं मृगा, अज्ञानात्तमसि द्रवन्ति भुजगाध्यासेन रज्जौ जनाः । अज्ञानाच्च |

1. Published in L. D. Series No. 34.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*Jñānacandrodaya*

स्थाणौ मनुष्यभ्रमो, वातोद्वेल्लितवार्धि-
वद्धि मृशतां चेतो विकल्पीयति ॥ (५.९९)

मग्नास्ते कर्ममूढाशयविनशलसद्भेदविज्ञान-
हीना, मग्नास्ते ज्ञानिनोऽपि स्वयमहमिकया
च्छन्दमन्दोद्यमा ये। ज्ञानी भूत्वा समन्ता-
दुपरि परिगता विश्वविश्वस्य साक्षात्,
कर्मव्यासात् प्रमादाचरणविरहिताः सन्ततं
ते तरन्ति ॥ (५.११५)

*Ātmakhyāti*

विकल्पचक्रकरणद्वातोत्तरङ्गाब्धिवत् शुद्ध-
ज्ञानमया अपि स्वयममी कर्त्री भवन्त्या-
कुलाः॥ (९७.५८, पृ० १६१)

मग्नाः कर्मनयावलम्बनपरा ज्ञानं न जानन्ति
ये मग्ना ज्ञाननयैषिणोऽपि यदतिस्वच्छन्द-
मन्दोद्यमाः। विश्वस्योपरि ते तरन्ति सततं
ज्ञानं भवन्तः स्वयं, ये कुर्वन्ति न कर्म
जातु न वशं यान्ति प्रमादस्य च।
(१६३.२, पृ० २३३)

*Jñānacandrodaya*

द्रव्यं तद् व्ययमानमत्र विगतप्राचीनया-
ऽवस्थया, व्युत्पादेन तदुत्तरप्रगुणया व्युत्पद्य-
मानं ततः। ध्रौव्यालम्बितमीक्ष्यतेऽभ्युपग-
तस्वावस्थितावस्थया, न स्वारूप्यमिदं
जहाति निजकं नोज्झत्यवस्थान्तरम् ॥
उपात्तमलिनावस्थं निर्मलावस्थयोदितम्।
उत्तरीयमिव द्रव्यं तेनोत्पादेन लक्ष्यते ॥
मलिनावस्थया तच्च व्ययमानं व्ययेन
तत्। ध्रौव्येणावस्थितावस्थमभिन्नं
स्वरूपतः ॥ तथाविधस्वरूपस्यावस्थाया-
मवलम्बते। स्वस्वरूपमभेदेन स्वरूपेणो-
त्तरीयवत् ॥ गुणैर्विस्तारसामान्ये-
तररूपात्मकैः सह। स्वरूपभेदमादत्ते
द्रव्यान्वयविवर्तिभिः ॥ तदायतविशेषा-
त्मरूपैः पर्यायवर्तिभिः। तन्तुभिर्लक्ष्यते
तद्वदुत्तरीयमिदं तथा ॥ (४ ७–१२)

*Tattvadīpikā*

न च तैरुत्पादादिभिर्गुणपर्यायैर्वा सह
द्रव्यं लक्ष्यलक्षणभेदेऽपि स्वरूपभेदमुप-
व्रजति, स्वरूपत एव द्रव्यस्य तथा
विधत्वादुत्तरीयवत्। यथा खलूत्तरीय-
मुपात्तमलिनावस्थं प्रक्षालितमम-
लावस्थयोत्पद्यमानं तेनोत्पादेन लक्ष्यते,
न च तेन सह स्वरूपभेदमुपव्रजति,
स्वरूपत एव तथाविधत्वमवलम्बते, तथा
द्रव्यमपि समुपात्तप्राक्तनावस्थं समुचित-
बहिरङ्गसाधनसन्निधिसद्भावे विचित्र-
बहुतरावस्थानं स्वरूपकर्तृकरणसामर्थ्य-
स्वभावेनान्तरङ्गसाधनतामुपागतेनानुग्रही-
तमुत्तरावस्थयोत्पद्यमानं तेनोत्पादेन
लक्ष्यते, न च तेन सह स्वरूपभेदमुप-
व्रजति, स्वरूपत एव तथाविधत्वमवल-
म्बते। यथा च तदेवोत्तरीयममलावस्थ-
योत्पद्यमानं...यथैव च तदेवोत्तरीयमेक-
कालममलावस्थयोत्पद्यमानं..यथैव च
तदेवोत्तरीयं विस्तारविशेषात्मकैर्गुणै-
र्लक्ष्यते..यथैव च तदेवोत्तरीयमायत-
विशेषात्मकैः पर्यायवर्तिभिस्तन्तुभि-
र्लक्ष्यते ..(२.३)

All this shows how Padmasundara digested and expressed ideas contained in the works of Kundakunda and Amṛtacandra.

—**Nagin J. Shah**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## संङ्केतसूचि

| | |
|---|---|
| **प्रसा** | प्रवचनसार, सं. आ. ने. उपाध्ये, बम्बई, १९३५ |
| **तदी** | अमृतचन्द्रविरचिता प्रवचनसारटीका तत्त्वदीपिका (उपर्युक्त संस्करण) |
| **ससा** | समयसार, सं. पं. मनोहरलाल, बम्बई, १९१९ |
| **आ** | अमृतचन्द्रविरचिता समयसारटीका आत्मख्याति (उपर्युक्त संस्करण) |

*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पद्मसुन्दरविरचितं

# ज्ञानचन्द्रोदयनाटकम्।

## प्रथमोऽङ्कः ।

॥ श्रीजिनाय नमः ॥

नमः सदसदव्यक्तविश्वरूपैकमूर्तये ।
स्वसंवित्तिप्रकाशाय सहजानन्दशालिने ॥१॥

अविकलचिदानन्दैकान्तस्वभावविजृम्भित-
प्रशमितपरद्रव्याकाङ्क्षानुषङ्गतरङ्गितम् ।
जयति जगति स्वैरोल्लासिप्रभाभरनिर्भर-
व्यतिकरलसल्लीलालीलायितं परमं महः ॥२॥

सकलपरमब्रह्मण्येकात्मतां गतवत्यपि
स्वरसरसवत्ताभिः स्वैरं समुल्लसतेतराम् ।
तनुमितिरिति प्रेक्षा प्रेक्षावतां स्फुरति स्फुटं
स खलु परमः प्राचां वाचामुदञ्चति किञ्चन ॥३॥

परमसहजानन्दोन्मज्जत्त्रिलोकसुखातिगे
ललितललनालीलोन्मीलद्विलासिविलासता ।
उदयति कुतः साक्षादन्विष्यमाणपरात्मनि
किमिव विलुलत्ताराकारा विभान्ति नभस्वति ॥४॥

निरुपमरसोद्गारस्तावन्न यावदनुद्गतः
परपरिणतेरुद्यद्भावः स्वभावगुणच्युतः ।
सकलविमलाखण्डज्ञानप्रकाशतया स्वयं
निजमहिमनिध्वस्तध्वान्ते चकास्ति चकासति ॥५॥

विशदसहजज्ञानश्रद्धावबोधविचक्षणः
सकलुषतया पुण्याकाङ्क्षाकलङ्कविलक्षणः ।
परमसमतामेकाग्रत्वेऽमलामवलम्बय-
न्नुचितपरमं हेयाहेयप्रपञ्चमुदञ्चति ॥६॥

व्यवहारनयाधीनमिति त्रैधं विभावयन् ।
परमार्थनयेनैकमालम्ब्य चितिं चेतये ॥७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुभाशुभोपयोगात्मजपातापिच्छरञ्जितः ।
शुद्धस्फटिकचिद्रूपो द्रवत्येकोऽप्यनेकधा ॥८॥

नार्थः स्वामपहाय चित्परिणतिं सत्तामिहालम्बते
नासौ तेन तदाश्रयाऽविरहिता शून्यप्रसङ्गत्वतः ।
द्रव्यं तद्गुणपर्ययानधिवसच्चाश्रित्य तच्चापरै-
र्भावैरात्मभु वा सहक्रमभवैरस्तित्वनिर्वर्तितम् ॥९॥

धर्मात्माऽयमनीदृशं परिणतश्चारित्रधर्मं पुमा-
नन्तर्बाह्यविकल्पजालरहितः शुद्धोपयोगी भवन् ।
आत्माऽऽत्मन्यवभासते व्युपरतो निष्प्रत्यनीकः परात्
तद्वत्तामतिलङ्घ्य कर्मवशगो बन्धं समासादयेत् ॥१०॥

कमभिलषति नैवात्मानुभूतिं विहाय
स्वयमपरमनन्ताह्लादरूपस्वरूपम् ।
ज्वलदचलमखण्डज्ञानमाद्यन्तमुक्तं
स्फुटमनुभवविद्वन्नात्मसादात्मनैव ॥११॥

व्यवहरणबलेन स्वान्यभावानुभूति-
व्यतिकरपरिरम्भाऽऽदानहानाप्ततत्त्वः ।
सकलकलुषशुद्धस्वान्तविश्रान्तमूर्तिः
स्पृशति विगतरागः सौवमुद्दाम धाम ॥१२॥

निर्भिद्योद्धतबन्धपद्धतिधुरामुद्भिद्य चिच्छक्तिता-
मुद्ग्रन्थिग्रथितान्तरायविगमादुज्जृम्भमाणः स्वयम् ।
साक्षादक्षपरोक्षनिर्मलतरज्ञानप्रभाभासुरो
ज्ञेयान्तर्गतनिर्विकारपरमानन्दात्मना नन्दति ॥१३॥

परमानन्दनिस्यन्दपीयूषरसनिर्भरः ।
परमात्माऽयमुद्गच्छन्नच्छचिच्छक्तिमात्रताम् ॥१४॥

शुद्धज्ञायकभावनिर्भरतया स्वातन्त्र्यमुद्रां दधत्
तद्वृत्तेर्विपरीततां कलयतः कर्मत्वमालम्बते ।
बिभ्राणः करणत्वमक्षमतयाऽन्यैः सम्प्रदानीभव-
न्नज्ञानापगमस्वभावमुदपादानी पराऽऽधारवान् ॥१५॥

---

१५ (श्लोकाङ्कः) = तदी १. १६ (पृ० २०)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्माऽऽत्मानमिहाऽऽत्मनाऽऽत्मन इतः शुद्धात्मनः स्वात्मनि
स्वद्रव्याद्युपलम्भलम्भनविधिप्रध्वस्तकर्मा स्वयम् ।
प्रोद्भूतः स्वमरीचिवीचिविलसच्चैतन्यचन्द्रातप-
स्नातः पूर्णकलामलं विजयते स्वायंभुवं तन्महः ॥१६॥

द्रव्यं द्रव्यतया चकास्ति सकलैः पर्यायभेदैरलं
वस्तुत्वेन हि वस्तु वस्तुत इदं नानाभिदा भिद्यते ।
ध्रौव्योत्पादविनश्वरत्वसहितः सद्भूतभावादयं
निस्त्रैगुण्यपथैक एव नियतं जाम्बूनदस्याङ्गदः ॥१७॥

शुद्धातीन्द्रियबोधमुद्धततरस्वानन्दकन्दोल्लस-
द्विज्ञानार्चिरशुद्धमोहतिमिरादुद्धर्तुकामः स्वयम् ।
द्वैतं भावमपास्य नित्यपरमाद्वैतामृतस्यन्दिनि
स्वीकृत्य स्व-परप्रकाशकतया स्वं भावमुन्मज्जति ॥१८॥

समरसरसिकस्य स्वाश्रयालम्बनोत्थ-
प्रविकसदमलार्चिःपुञ्जमज्जत्समाधेः ।
न हि किमपि परोक्षं सर्वमध्यक्षमेत-
ज्जगदवगतविश्वग्भावनिस्तन्द्रवृत्तेः ॥१९॥

प्रध्वस्तान्धतमःप्रकाशितलसद्विज्ञानभानुप्रभा-
भाराक्रान्तसमस्तवस्तुसदसद्भावानुभावस्थितिः ।
शश्वद्विश्वमविश्वरूपमखिलं ज्ञानाम्बुधौ मज्जयन्
शुद्धादर्शतलामलोपमवपुर्जीयाज्जिनः सर्वगः ॥२०॥

कुसुमितवनराजीमञ्जरीपुञ्जगुञ्ज-
द्भ्रमररवणवीणानन्दकन्दायमानः ।
परिलसदमलान्तर्बोधशुद्धोपलम्भः
द्रुतकनकमिवान्तर्वर्ति जागर्ति यस्य ॥२१॥ युग्मम् ॥

प्राकारत्रयनिर्जितोर्जितमितत्रैलोक्यलोकद्युते-
र्गर्जद्घोरघनाघनारवजयो गम्भीरदिव्यध्वनिः ।
यस्योद्यद्वदनेन्दुमण्डलमिलद्भामण्डलद्योतिता
द्यौरुत्तम्भितसूर्यमण्डललसद्बिम्बाऽनुविभ्राजते ॥२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निस्तरङ्गनिजरङ्गसङ्गमस्वादुमेदुरमुदारसम्पदम् ।
निर्विकारमनुबिभ्रदुत्तमं विस्फुरद्विमलकेवलं महः ॥२३॥

सहजसुधारसलहरीक्षीराम्बुधिमध्यमग्नलावण्यः ।
निर्भरपरमानन्दो जिनेन्द्रचन्द्रः सदा जयति ॥२४॥ युग्मम् ॥

ज्ञेयानन्त्योपदर्शि प्रतिनियतयथावस्थितार्थस्वभाव-
ज्ञानानन्तत्ववाच्यं निजसहजरसज्ञानमुज्जृम्भतेऽस्य ।
ज्ञानं तु ज्ञेयनिष्ठं दहन इह यथा दाह्यनिष्ठस्तथेति
ज्ञानाविच्छिन्नरूपं समगुणगुणितं द्रव्यमुच्चैश्चकास्ति ॥२५॥

ज्ञानाद्यद्यतिरिच्यते घटपटस्थानीयतामागतो
हीनत्वेन विवृण्वतः स्वसमवेतत्वाद्यभावादचित् ।
तज्जानाति कथं स्वरूपपररूपत्वव्यवस्थापना-
मित्थं ज्ञानसमान एव परमात्माऽयं समुज्जृम्भते ॥२६॥

ज्ञेयाकारविवेचनक्षममिति ज्ञानं ततस्तन्मयी-
भूय स्वव्यपदेशभाग् भवगतः सर्वज्ञताऽऽचक्ष्यते ।
सर्वे तद्विषयाः स्वतत्त्वमपरित्यज्यापरेऽर्थाः स्वत-
श्चिद्रूपात्मतया चकास्ति सहजाद्वैतावलम्बी पुमान् ॥२७॥

आत्मा ज्ञानमतो निराश्रयवशादज्ञानतापद्यते
ज्ञानं चापि स चेदनात्मकतया तस्याप्यसिद्धिर्ध्रुवम् ।
इत्थं तन्निरुपाध्यनादिनिधनानन्यत्वसम्बन्धभा-
गेकोऽनेकतया गुणी तदविनाभूतोऽभिसम्भाव्यताम् ॥२८॥

चक्षू रूपमसंस्पृशन्न पतितं दृश्यं तदप्यात्मसा-
त्कुर्वन्नित्ययमप्यतीन्द्रियपरश्चिच्छक्त्यभिव्यक्तिभिः ।
अस्पृष्टोऽप्यनवस्थितः कवलयन्नर्थानिवानन्दता-
कल्लोलाकुलकेलिखेलनविधौ जागर्ति कौतूहली ॥२९॥

तद्दुग्धाध्युषिताभिभूय विलसन्नीलेन्द्रनीलद्युतिः
स्वसंवेदनमात्मसाद्विरचयन्नन्यानभिव्याप्य सः ।

---

२५ = तदी १.२३ । २६ = प्रसा १.२४-२५, तदी १. २४-२५ । २८ = प्रसा १.२७, तदी १.२७ । २९ = तदी १.२९ । ३० = प्रसा १.३०, तदी १.३० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्यर्था न चिदि स्फुटं न तदपि ज्ञानं लसत्यात्मनि
स्वं साक्षान्मुकुरुन्दसुन्दरलसदबिम्बानुगं बिभ्रति ॥३०॥

नात्मानुभूतिमपहाय परानुभूति-
मुन्मेषयत्यमलकेवलचन्द्रकान्तिः ।
आनन्दकन्दमकरन्दमनङ्कपङ्कः
स्वं धाम चेतयति चेतनचञ्चरीकः ॥३१॥

अभ्यस्यतामुपरताखिलवाच्यवीचि-
कल्लोलजालकलनाभिरभिप्रशान्तः ।
*नाऽनन्यजन्यमहिमा महिमानमस्य
किं वर्णयाम कवलीकृतवाक्प्रपञ्चम् ॥३२॥

शब्दब्रह्मवितर्कवाक्यरचनातज्ज्ञप्तिरेव श्रुतं
तत्सञ्चेतनयैव चेतनमयो निर्द्वन्द्वतामुल्लसन् ।
ज्ञानज्ञायक एष एव परमैश्वर्यावलम्बी परा-
नन्तर्लीनविशुद्धबोधपरमो निर्भेदमाभेदयन् ॥३३॥

पश्य मार्गमवगम्य योगिनां
पुद्गलात् किमपि धाम यत् पृथक् ।
कीदृशी स्तिमितलोचनस्य ते
पोस्फुरीति मतिरद्भुताद्भुता ॥३४॥

द्वैतभावमपहाय निश्चल-
स्वानुभूतिविषयीकृतात्मना ।
भूतभावभवदीक्षणक्षमं
चेतयाऽऽशु चिति चेतनात्मकम् ॥३५॥

परिच्छेत्ता मृग्यः स्वपरपरिणामस्य महतो
क्रिया ज्ञप्तिः स्वस्मिन्नवतरति विज्ञानविषया ।
नयानीकक्षोभक्षपणनिपुणानन्तमहिम-
प्रकाशस्वातन्त्र्यं लसति परभावं कवलयन् ॥३६॥

---

३३ = तदी १.३४। ३६–३७=तदी १.३६। *'ना पुरुषः' इति प्रतौ टिप्पणम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञेयालम्बिज्ञानभावेन भावो
द्रव्यालम्बिज्ञानमेवास्य पुंसः ।
तस्मान्नैष च्छिद्यते भेदभावै-
रव्यापन्नो मृग्यतामद्वितीयः ॥३७॥

संवित्समुच्छलदनल्पविकल्पतल्प-
मुच्छिद्य वेद्यपरतामवलम्ब्य साक्षात् ।
चैतन्यविन्यसनवस्त्ववबोधसौध—
शुद्धान्तपद्धतिमवातरदस्तु वस्तु ॥३८॥

पटे शुक्ले वर्णाः सित-हरित-पीतारुणतरा
विचित्रा दृश्यन्ते दृगवगमविज्ञानघटिताः ।
तथैवात्मारामः परमसमसंवित्तिविशदः
परेषामादर्शी परिणमति तादात्विकतया ॥३९॥

सर्वे ये भाविभूताः प्रतिफलनतया सन्ति भावानुभावा
ज्ञानादर्शोपलम्भेऽनुभवनभवनाभोगमुद्रासमानाः ।
प्रत्यक्षाः शुद्धबुद्धातिशयशयगुणव्यक्तिशक्तिप्रभावात्
सद्भूताः सर्वदैव ज्वलदचलमहानन्दकन्दामृताब्धौ ॥४०॥

जाताजातमतन्द्रितं यदि पुनः प्रत्यक्षमक्ष्णां परं
प्रत्यक्षं न करोति तत्तदखिलं कौतस्कुती दिव्यता ।
आक्रम्याक्रमविक्रमप्रतपनप्रोज्जृम्भितारवण्डिता—
नन्तज्ञानविधानमानसतिरस्कारी जरीजृम्म्यते ॥४१॥

प्रलीनानुत्पन्नानखिलपरभावानगणिता-
नशक्यस्तद् वक्तुं किमपि च परोक्षं स्वविषयम् ।
यदीहापूर्वैः स्वक्रमसमयजातैर्विषयिणां
परिच्छेदस्तत्किं किल सकलकालं कलयति ॥४२॥

व्याप्यव्यापकतापक्षकक्षीकारो जडात्मनः ।
धूमधूमध्वजन्यायादशुद्धस्यैव कल्पते ॥४३॥

---

३९ = तदी १.३७ (उत्थानिकासहित) । ४० = प्रसा १.३८, तदी १.३८। ४१ = प्रसा १.३९, तदी १.३९। ४२ = प्रसा १.४०, तदी १.४० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञेयज्ञानज्ञायकैकान्तवृत्त्या
वर्तिष्यन्ते ये स्वयं धाम तेषाम् ।
अत्युत्तालोच्छालवाचालवीचि
स्वात्मद्रव्यं तच्चमच्चर्करोति ॥४४॥

मूर्तामूर्तं सप्रदेशाप्रदेशं
जाताजातं चापि पर्यायजातम् ।
वृत्तं वत्स्यद् वर्तमानं त्रिकालं
जानीते यत् केवलज्ञानमेतत् ॥४५॥

वल्गत्युद्दामधामप्रसरसरभसारम्भरम्भोरुलीला–
शीलोन्मत्तप्रमीलारसवशसहजानन्दघूर्मायमाणः ।
जागर्त्यावर्तगर्तागतविवरदरीध्वान्तविध्वंसनांशु-
स्फूर्जज्ज्वालाकलापस्फुटतरतरणिर्विश्वविश्वार्थदृश्वा ॥४६॥

जागर्ति ज्वलति द्रवत्यहरहः प्रोज्जृम्भते जृम्भतेऽ-
प्युत्सर्पत्यवसर्पति प्रविलसत्युल्लासति स्वात्मनि ।
वल्गत्युच्छलति स्फुरत्युदयति स्फूर्जत्यनेकान्तता-
मानन्दामृतपूरपूर्णजलधावुन्निद्रमुन्मज्जति ॥४७॥

उदितमुदितमुच्चैरुच्चमुच्चावचान्त-
र्गतसकलविकल्पाचूलमूलंकषत्वम् ।
विदितविशदधामोद्दामचैतन्यमूर्तिः
स्फुरति च निरवद्यानन्दविद्याविनोदी ॥४८॥

ये बाह्यार्थपरिग्रहव्यसनतानिर्द्वन्द्वरूपाः स्थिर-
स्वान्ताह्लादितशुद्धतत्त्वनियतानन्दोपलब्ध्यर्थिनः ।
तेषां चेतसि विस्फुरन्ति विलसद्ब्रह्मैकविद्याविदां
प्रोणन्त्यो भुवि **पद्मसुन्दरकवेः** संदर्भिताः **सूक्तयः** ॥४९॥

इति परमात्मपूर्वरङ्गः पूर्णः ।

इति श्रीज्ञानचन्द्रोदयनाटके **परमात्मविवरणे**
प्रथमोऽङ्कः परिपूर्णः ॥१॥

---

४५=प्रशा १.४१, तदी १.४१ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# द्वितीयोऽङ्कः

अथ जीवो द्विपात्रीभूयावतरति । बन्धः प्रविशति ।

परिच्छेद्यं यद्वा परिणमति विज्ञानजलधि-
र्न तज्ज्ञानं तस्य स्फुटमविकलं क्षायिकमतः ।
विधत्ते कर्मैवासहसहजविज्ञानविकल-
श्चरित्रं तद्वन्ध्यं कृतमिव गजस्नानमभितः ॥१॥

द्रव्यप्रत्ययसन्ततेरवतरन्मोहाज्ञताविभ्रम-
भ्रान्त्याऽनादिभवोच्छितेरनुसरद्भावानुबन्धोदयः ।
सम्यग्दृष्टिरसद्दृशामिव न तद्भावानुवर्ती क्षणं
तद्बन्धोऽपि निरागसामिह कुतः स्यादप्यशुद्धात्मनाम् ॥२॥

अन्तरेण मनसा न विकारस्तं विनाऽवतरति क च बन्धः ।
स्वानुभूतिरतिरञ्जितवृत्तेर्ज्ञानमस्य निरुणद्धि नवीनम् ॥३॥

अर्हतां ध्वनिरनुद्रतमेको निस्सरत्यभिनिरीहितवृत्तिः ।
गर्जनं स्वत इवाणुविशेषादम्बुवर्षणमिवाम्बुधराणाम् ॥४॥

यद्ययं शुभतदुत्तरभावान्नाश्रवत्यनुभवैरनुवेलम् ।
आजवंजवविनाभवनात् तन्मुक्त एतदपि युक्तिवियुक्तम् ॥५॥

अथ द्विपात्रोऽप्येकपात्रीभूयावतरति परमात्मा ।

तत्स्वभाव-परभाव-विभावै-
रात्मनः स्वजनितैः परिणामैः ।
मुक्ति-बन्धमनुसृत्य सदाऽयं
स्वानुभूतिमभिनन्दति शुद्धः ॥६॥

सेतरेतरविरोधविधानध्वंसि विस्फुरति निर्व्यवधानम् ।
केवलं कवलिताखिलकालव्याप्तिरूपमनिरूपितरूपम् ॥७॥

---

२–४=तदी १. ४४–४५ । ५ = तदी १.४६ । ७–८ = तदी १.४७ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वयमुद्गतधामचित्समुद्रे
प्लवमानोऽपि समन्ततश्चकास्ति ।
ननु सर्वमिवानुविद्धमंशै-
र्विषमविचित्रमखर्वसर्वमूर्तिः ॥८॥

युगपज्जगदप्यसङ्ख्यसङ्ख्यैः
समवच्छिन्नमनन्तधर्मभेदैः ।
ददृशे सुदृशा स्वयं च तेभ्यः
प्रविविक्तेन न वस्तु तेन तेने ॥९॥

अनुसमयमनन्तधामधामा-
द्भुतपर्यायनिबन्धनात्मबोधः ।
परिलसति परप्रकाशकर्ता
न तमभ्येति परस्परावगुण्ठः ॥१०॥

क्रमगतमथवा चेज्ज्ञानमर्थान् प्रतीत्य
स्फुरति तदवबोधादन्यबोधे विलम्बः ।
सदसदिव विकल्पज्ञानमस्यापि न स्यात्
सकलगतमनन्तं क्षायिकं न क्षमेत ॥११॥

युगपदखिललोकालोकभावानुभूत-
प्रभवदनुभविष्यत्सर्वभावावभासि ।
सकलमलकलङ्कातङ्कपङ्कप्रणाशात्
प्रकटितसकलार्थव्यक्तिरूपं चकास्ति ॥१२॥

तदेव सकलज्ञानमविसंवादि सर्वगम् ।
त्रैकालिकमिहाध्यक्षं प्रत्यक्षमवलम्बते ॥१३॥

परिणमति न चार्थान् नाददाति स्वयं वा
त्यजति न विदधाति ज्ञप्तिविस्तारपोतान् ।
पृथगथ विमलार्चिर्बोधशुद्धोपलम्भा-
दनुसरति न बन्धं लुप्तनिःशेषकर्मा ॥१४॥

९=तदी १.४८। १०=तदी १.४८-४९। ११=प्रसा १.५०, तदी १.५०।
१२=तदी १.५१। १४=प्रसा १.५२, तदी १.५२।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुपमरसमग्नानन्तचैतन्यधाम-
प्रसभविकसदच्छव्यक्तिचिच्छक्तिरूपैः ।
विषयसुखविरूपातीन्द्रियामूर्तसौख्यं
विलसति कथमन्यस्यावकाशं क्षमेत ॥१५॥

उद्भिन्नानन्तशुद्धिप्रचलदविकलानन्तविज्ञानदुग्धां-
भोधेरुद्वेलनेन प्रकटितसकलद्रव्यरत्नप्रकाशः ।
चैतन्यानन्यजन्यस्फुटमहिमहिमप्लुष्टसर्वान्यभावो
भावाभावप्रवृत्तः प्रसरति परमं निर्विरामस्वधाम ॥१६॥

मूर्तः पुद्गलसाहचर्यवशतोऽमूर्तोऽप्यतीतेन्द्रियः
प्रत्यक्षाक्षकदम्बकोऽपरिमितज्ञानी यदज्ञानवान् ।
शक्तिव्यग्रतयाविसंस्थुलदशामालम्बमानस्तथाऽ-
प्यन्तस्तत्त्वविवेचकैरयमुपादेयस्तु हेयोऽपरः ॥१७॥

स्वच्छन्दानन्दकन्दद्रवरसलहरीमध्यमध्यासमान-
स्तन्द्राविद्रावणान्तःप्रकटितपरमज्ञानलीलाविलासः ।
उद्यन्मोहप्ररोहोद्भवदवदहनः स्वप्रभामुज्जिहीते
रागद्वेषद्विषोऽन्तःकरणरणवशाद् ध्वंसयन्नुन्ममज्ज ॥१८॥

काकाक्षितारकतरत्तरलावकाश-
व्यासक्तसर्वकरणावगमप्रवृत्तिः ।
प्रत्यक्षमक्षजनितावगमस्वरूपं
तत्किं निजात्मनि विभाति परोपलब्धिः ॥१९॥

परोक्षज्ञानमक्षाणामतत्त्वार्थबुभुत्सया ।
प्रत्यक्षमक्षसान्निध्याऽविज्ञानादात्मसादतः ॥२०॥

परपरिणतिजन्यादिन्द्रियज्ञानरूपा-
द्भवति यदुपलब्धिस्तत् परोक्षं प्रतीक्ष्यम् ।
परगुणमनपेक्ष्यापेक्ष्य शुद्धात्मशुद्धिं
प्रतिफलति तदेवाध्यक्षमक्षं समक्षम् ॥२१॥

---

१५=प्रसा १. ५३, तदी १.५३ । १७=प्रसा १.५५, तदी १.५५ ।
१९=तदी १.५६ । २०=प्रसा १.५७-५८ । २१=तदी १.५८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रोद्भूतं स्वयमुच्छलद्विमलविज्ञानार्चिरभ्यर्चितं
शश्वद्भास्वरयौगपद्यविलसद्बोधात् समन्तस्थितम् ।
द्रव्यानन्त्यबुभुत्सयाऽभ्युपगतं दुष्कर्मनिर्मूलना-
दित्यात्यन्तिकसौख्यतुल्यममलं प्रत्यक्षमालक्ष्यताम् ॥२२॥

ज्वलद्विमलकेवलग्लपितलोकलोकोत्तर--
स्फुरद्वरनिरङ्कुशानपरशक्त्यभिव्यक्तिभिः ।
प्रलीनमलिनीलिमप्रथमरोहमोहोदया--
दनाकुलमवस्थितं त्विदमुदारमुज्जृम्भते ॥२३॥

अनादिनिधनं धनं प्रशमसङ्गनिर्वेदिना-
मखेदमनिवेदितं स्वरसरङ्गसङ्गस्फुटम् ।
वितर्कतरकर्कशस्वपरखेदभेदभ्रम-
प्रमाथि निरुपाधि यज्जयति निष्प्रकम्पं महः ॥२४॥

क्वचिद् विशददर्शनं क्वचिदनन्तबोधात्मकं
क्वचिल्लसति तद्द्वयं क्वचिदतद्द्वयं चाद्वयम् ।
क्वचिच्चिदचितश्चमच्चरिकरीति चित्रं पृथक्
क्वचित् प्रकृतिकृन्तने निशितखड्गधारं क्वचित् ॥२५॥

सघनघनघातिकर्मप्रतिघातोद्भूतसहजसुखविमुखः ।
परमार्थसुखमजानन् न श्रद्धत्ते परं सौख्यम् ॥२६॥

करणोपपन्नमिदमक्षसुखं
ननु दुःखमेव गदितं कुशलैः ।
समभिद्रुताः करणजैः सहजै-
र्विषयेषु रंरमति मोहवशात् ॥२७॥

पिपासित इतस्ततो मरुमरीचिवीचीषु
चेत् परिभ्रमति विभ्रमी भ्रमणविभ्रमभ्रामितः ।
पिबेज्जलमतस्ततस्ततरतोपभोगोद्भवैः
कथं स खलु तृप्यति स्मरसुखैर्विपाकोदितैः ॥२८॥

---

२२=प्रसा १.५९, तदो १.५९ । २३=तदी १.६० । २६=प्रसा १.६२ ।
२७=प्रसा १.६३ । २८=तदी १.७५ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवदिन्द्रियपरत्वपरत्व-
प्राप्यकारि निरकारि न येन ।
दुर्निवारमिदमस्य च दुःखं
तद्वियोगपरिभोगविकल्पात् ॥२९॥

यद्यभीष्टमनभीष्टमनिष्टं
श्रेष्ठमित्यसदृशाभिनिवेशः ।
स्वं विगोप्य परतामुपयुक्तः
पश्यतामहह ! मोहमहत्त्वम् ॥३०॥

प्राग्बन्धाभिनिबद्धदुर्द्धरमहामोहाख्यकादम्बरी-
पानव्याकुलितस्वचेतनवशादुन्मत्तलीलां दधत् ।
विश्वं व्याकुलयत्ययं च विकलः प्रभ्रष्टसंचेतनो
जागर्ति क्षणमुत्क्षिपन्नविकलज्ञानानुसंबोधनम् ॥३१॥

स्फुरितविशदभेदज्ञानमूलानुकूल-
श्चकितमिव चकासामास चैतन्यचिह्नः ।
द्युमणिरिव महोभिर्व्यद्युतद् द्योतमानः
स्वयमयमनुभूतिव्यक्तिशक्तिं व्यनक्ति ॥३२॥

नाशुभं शुभमुरीकरवाम
स्वं विहाय न परं च भजाम ।
तस्थिमस्थिरद्वयस्थित-
चित्ता बोधसद्मनि परात्मनि नित्यम् ॥३३॥

इत्थमुत्थितनिरञ्जनविद्यादण्डखण्डितपरभ्रमकुम्भः ।
स्वैरमाविरभवद् भवभेदी निःसपत्ननिजभावमुपास्य ॥३४॥

जलायुकास्तृष्णाङ्कुरजनितसौख्यानुभवनात्
पिबन्त्यः कीलालं स्फुटमभिलषन्तः सुकृतिनः ।
उदर्ककक्लेशेन प्रतिफलति तत्पुण्यमखिलं
तदायत्यामन्तर्गतनिजसुखाभासमसुखम् ॥३५॥

---

२९=तदी १.६४ । ३०=तदी १.६५ । ३२=प्रशा १.६८ । ३५=तदी १.७५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सपरमपरं शश्वद्बाधाभिधावितमाकुलं
विषमविषमं सम्यग्बन्धत्वकारणदारुणम् ।
द्वयमिदमिदं पुण्यापुण्यं विवेच्य विवेचकः
श्रयति परमात्मानं व्यक्तं परप्रकृतिस्मृतेः ॥३६॥

सोऽहमिन्द्रप्रदवीनिबन्धनं
निश्चिनोति खलु यस्तु मूढधीः ।
चित्तभित्तिमनुरञ्जयन्नयं
स्वं निमज्जयति मोहसागरे ॥३७॥

अतः प्रत्यग्बन्धादनुसरदिदं विश्वविमलं
वियत्तामालम्ब्य स्वयमिव निरालम्बनतया ।
समुत्तस्थौ विष्वक्करणनिकुरम्बप्रमथने
चकासांचक्रे तज्जगदखिलमच्छाच्छकिरणैः ॥३८॥

इत्थं वितत्य निजतरङ्गभङ्गा-
नुन्मूल्य सर्वपरभावतरुप्ररोहान् ।
चिन्मेघपूर्णपरमात्मसरिल्लसन्ती
श्रीपद्मसुन्दरमुनीन्द्रकृताभिषेका ॥३९॥

इति श्रीज्ञानचन्द्रोदयनाटके परमात्मविवरणे
द्वितीयोऽङ्कः पूर्णः ।२।

---

३६=प्रसा १.७६, तदी १.७६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्फुरति विशदज्ञानेऽज्ञानेऽवसीदति नोच्चकै-
रुदयमदयं द्वैतस्यायं विवेच्य विदारयन् ।
उदयतितमामग्नेर्योगाद् विभिन्न इवायसो
द्रुघणघनताजन्यं दुःखं क्षयं नयति क्षणात् ॥१॥

सर्वारम्भस्तम्भशोभायमानं
प्रोन्मूल्याद्यं मोहहर्म्यं सुरम्यम् ।
स्वात्मारामे रंरमीत्येकवेलं
नीत्वा वैरं स्वैरतामभ्यनन्दत् ॥२॥

यत्रान्वयान्वयविशेषणचिद्विवर्त-
ग्रन्थीयमानजननव्यतिरेकरूपाः ।
त्रैकालिकाः कलनयाऽपि न वस्तुतस्तु
मुक्तानुविद्धतनुसूत्रमिव स्फुरन्ति ॥३॥

चिदानन्दस्पन्दप्रसृमरतरज्योतिरमल-
प्रलम्बप्रालम्बे गुणमणिगणोद्गुम्फनमिव ।
विधायान्तर्धानं चिति चरितचैतन्यविलस-
त्तरङ्गास्तारङ्गे निजसहजरङ्गं विदधते ॥४॥

एकपात्रीभूय सामान्यबन्धो निष्क्रान्तः । अथ विशेषबन्धो मोहरूपेण त्रिपात्रीभूयावतरति ।

तावद्वैरं रचयतुतरां मोहमूर्धाभिषिक्त-
स्कन्धाचारोद्भटभटघटारागरोषादिवर्गः ।
यावन्नायं सकलविमलज्ञानशाणेन धारां
धत्ते सर्वंकषपरतयाऽरूपचिद्रूपभूपः ॥५॥

रागद्वेषद्वयभ्रान्तिमदिरोन्मत्तचेतनः ।
अद्वैतमपि द्वैतं भावयत्यविवेकतः ॥६॥

तद्द्रव्यगुणपर्यायकर्तृकर्मादिभेदतः ।
निर्विकारमयं ब्रह्म चैतन्यं चिति चिन्तयेत् ॥७॥

---

३–४=तदी १.८० । ६=प्रसा १.८३, तदी १.८३ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदमेकान्तविश्रान्तचिच्चमत्कारलक्षणम् ।
अखण्डमचलं धाम स्वात्मारामसुदञ्चयेत् ॥८॥

उद्यत्सान्द्रसुधासुधांशुकिरणव्याविद्धचन्द्रोपल-
ज्योत्स्नानिर्भरवस्तुवास्तवसमावस्थानतावस्थितम् ।
द्वैताद्वैतमिति प्रपञ्चरचनामुत्क्षिप्य पक्षान्तरं
स्वारूप्यानुभवैकगम्यचरितं चित्ते चिरं धारय ॥९॥

रागद्वेषद्वयदृढतरग्रन्थिगुम्फावरुद्धो
द्रव्याद्यन्यत्वपरपरिणत्याऽऽददानः परत्वम् ।
अज्ञानात्मभ्रमभरतिरस्कारकारो जजृम्भे
भेदज्ञानप्रसरभिदुरोद्भेदनेन स्वभेदम् ॥१०॥

उन्मज्जत्क्षीरसिन्धुद्रवरसलहरीमध्यमध्यागतोऽयं
प्रोन्मीलन्मोहरागद्वयविविधविधं सेतुबन्धं बबन्ध ।
बन्धः सम्बन्धपूर्वक्रमगतपरमाश्लेषसंश्लेषदोषात्
संविदम्भोलिधारा किरणविकिरणैर्दीयतां निर्दयेन ॥११॥

प्रत्यक्षादिप्रमाणाज्जिनवचनचयापेक्षितार्थप्रतीते-
र्बुद्ध्वा द्रव्यादिभावान् स्वगतमतिबलादात्मतत्त्वावबोधे ।
प्रोद्भूते मोहपक्षक्षपणनिपुणतामादधानः परेभ्यो
व्यावृत्य स्वच्छशुद्धस्वरसवशतया स्वस्वभावं धिनोति ॥१२॥

शब्दब्रह्मविविक्ततत्त्वमचलं निश्चित्य निश्चिन्तता-
माधाय क्षणमक्षपक्षमभितः कार्यं कृषित्वात् क्षयम् ।
नीत्वा जेतुमभीप्सुरुद्धतमहामोहप्रतापोदयं
प्रारेभे रणरङ्गमङ्गसकलज्ञानासिधारः पुमान् ॥१३॥

अर्थास्तद्गुणपर्ययास्तदनु तैर्द्रव्याणि चासंज्ञिता
द्रव्यत्वेन हि पीततादिगुणभृद्वर्णं सुवर्णं यतः ।
पर्यायत्वमियर्ति बाहुवलयादेर्भूषणस्यापि यद्
द्रव्यं तत्र घटामियर्ति परमब्रह्मैव तेभ्योऽपृथक् ॥१४॥

---

१०=तदी १.८२ । ११=तदी १.८३ । १२-१३=तदी १.८६, ८८ ।
१४=तदी १.८७ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थं ब्रह्म सनातनं निरुपमद्रव्यार्थरूपं परा-
चीनं यत् परतः स्वभावविषयं रागाद्युपाधिच्युतम् ।
पूर्णज्ञानकलाविलासविलसच्चैतन्यमुन्मीयतां
चित्संविन्निशितासिनाशितमहामोहेशदुःशासनम् ॥१५॥
निशिततरवारिधारापथीनमवलम्ब्य जैनमुपदेशम् ।
दारय निर्दयहृदयं मोहमहादुष्टभटकटकम् ॥१६॥

बन्धो निष्क्रान्तः । अथ प्रविशति संवररूपा स्वसंविदनुभूतिः ।

परिच्छिनत्त्यविच्छिन्नचैतन्येनात्मतां स्वयम् ।
परं च परकीयेन सविशेषविवेचकः ॥१७॥
संन्यस्यापरभावमात्मगुणतामादाय शुद्धस्फुरत्-
संवित्तिप्रतिपत्तिनिश्चलधिया ये लब्धवर्णाः किल ।
तद् द्रव्यं सकृत्त्रिकालकलितध्रौव्यं समत्वे समा-
लम्बन्तामपहाय तद्विसदृशं द्रव्यान्तरं तत्समम् ॥१८॥
निश्चिन्वन्नहमात्मसादभिलसच्चैतन्यमुद्राङ्कित-
स्फारस्फूर्जदमन्दसुन्दरमहो मन्दारकन्दायितम् ।
नाहं द्रव्यमनात्मनीनमभितो निर्वासितान्तर्बहि-
र्ज्वालाजालकलाकलापकलितश्चैतन्यचन्द्रोदयः ॥१९॥
सजातीयविजातीयभेदानासद्य तत्त्ववित् ।
सजातीयविजातीयभेदेभ्यो भिन्नमीक्ष्यताम् ॥२०॥
परिच्छिन्दन्नन्तःस्वपरपरतामभ्रमतया
विभिद्य स्वारूप्यं सदृशतुलनां बिभ्रदपि च ।
समाकीर्णा यद्वत् कनककणिका धूलिपटलै-
रिवादाय स्वस्यापनयनविधौ शुद्धिरजनि ॥२१॥
अशुभशुभनिशुम्भनाय शुभ्रद्युतिरतिनिर्वचनीयशुद्धबोधः ।
अवधूतकृतकृत्यतामवाप्य प्रसभमनाकुलमाकलय्य तस्थौ ॥२२॥
आत्मज्ञानविजृम्भिताऽप्रतिहतालोकान्तदृष्टिः परा ।
रागद्वेषविशुद्धशुद्धसकलादर्शोल्लसद्दर्शनम् ।
निर्धौताखिलघातिकल्मषतया चिच्चेतनस्यात्मनः
स्वच्छन्दं प्रससार सारपरमानन्दात्मरूपं महः ॥२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निहता न पुनर्भवं भवित्री
स्फुटमेकान्तनितान्तमोहदृष्टिः ।
निजचिन्निशितासितासिधारा-
परिपातैरपतत्परोपलब्धेः ॥२४॥

आस्तामस्तसमस्तवस्तुकलितान्तर्जल्पकोलाहलः
क्रीडत्स्वैरतरङ्गितोत्कलिकया क्रीडन्नयं बध्यते ।
तद्द्रव्यान्तरसङ्क्रमक्रमभुवः संवेदनात् का कथा
तत्तज्जल्पविकल्पजालविकलो बन्धच्छिदा मृश्यताम् ॥२५॥

घटाकाशपटाकाशभेदभिन्नमभेदतः ।
विमृश्य वस्तुवस्तुत्वमवलम्बय निश्चयम् ॥२६॥

निर्विकारनिजाधीनस्वसंवेद्यं सुखं सुखम् ।
स्वर्गश्वभ्रादिकं सौख्यं दुःखं वा दुःखमेव तत् ॥२७॥

उन्मूल्याचूलमूलामनुभवनियतद्रोहमोहानुभूतिं
विज्ञायान्तःस्वरूपं प्रविकशदमलज्ञानमज्ञानभिन्नम् ।
विस्फूर्जद्दिव्यधामस्नपितपरिलसच्चारुचैतन्यपुरो-
दञ्चच्चन्द्रातपान्तर्गतजगदजगद् भाति सूक्ष्माणुरूपम् ॥२८॥

विशुद्धमुद्धतैकान्तशुद्धशुद्धोपयोगिनम् ।
निष्कामनिर्विरामैकमात्मारामममहं भजे ॥२९॥

स्वपरस्वोररीकारतिरस्कारपरायणः ।
ध्याता ध्यायति तद्ध्यानध्येयरूपमनेकतः ॥३०॥

उद्धतध्वान्तविध्वंसिचण्डमार्तण्डमण्डलः ।
जागर्ति जगदावर्तगर्ते निर्वर्तयन्नयम् ॥३१॥

बिभ्रच्छुभ्रतरङ्गरङ्गितलसद्विज्ञानदुग्धाम्बुधि--
प्रोन्मज्जत्परमात्मदिग्गजघटाघण्टारणत्कारितं ।
शब्दब्रह्मसमुल्लसत्यविकलज्ञानं समुल्लासयत्
सान्तर्बाह्यचिदुच्छलच्छविपरब्रह्मैकतामानयत् ॥३२॥

विज्ञानघनमात्मानमन्यशून्यं विचिन्तयेत् ।
श्रीपद्मसुन्दरस्यायमुपदेशो विशेषतः ॥३३॥

निष्क्रान्ता सामान्यसंविदनुभूतिः ।

इति श्रीज्ञानचन्द्रोदयनाटके परमात्मविवरणे
तृतीयोऽङ्कः पूर्णः ॥३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चतुर्थोऽङ्कः ।

अथ विशेषसंविदनुभूतिः प्रविशति ।

सर्वो द्रव्यमयः पदार्थ इह यत् तेनाभिनिर्वर्तित-
स्तद्द्रव्याणि गुणात्मकानि युगपद् द्वन्द्वात्मकाः पर्ययाः ।
द्वेधा तेऽपि समानतत्परतरैर्जातीयभेदैर्गुणा-
स्तत्स्वाभाविकवृद्धिहानिपतिता वैभाविकाश्चापरे ॥१॥

तन्तुत्वेन पटः समानसमुदायत्वेन निर्वर्तित-
स्तद्वत् तन्तुगुणात्मता पृथगुपालम्भोपपत्तिर्ध्रुवम् ।
पर्यायो गुरुलघ्वनन्यगुणव[द्]द्वारेण रूपादिभिः
साधीयानिह तारतम्यविविधः पक्षः समाचक्ष्यताम् ॥२॥

ये चैकान्तनिरर्गलोच्छलदहङ्कारप्रकारभ्रम-
भ्रान्तास्तन्ममकारतामुपगताः क्रोडीकृताशक्तयः ।
प्रच्युत्यात्मविदो ममैतदसहाहङ्कारकारागृहे
बद्धा ज्ञानविभुप्रसादभवनाभावाद् विमुक्तिः कुतः ॥३॥

येऽनेकान्तविजृम्भितप्रकटितप्रव्यक्तिशक्तिद्रुता-
हङ्कारादिपरिग्रहग्रहसमावेशं समाशंसते ।
ते स्वाभाविकभिन्नसभ्रविलसद्रत्नप्रदीपस्फुर-
ज्ज्योतीरूपमिवैकमभ्युपगताः संशेरते नापरे ॥४॥

रागद्वेषोन्मेषनिःशेषदोष-
भ्रंशादंशायातशुद्धप्रकाशः ।
कासांचक्रे चक्रमाक्रम्य कर्म-
प्रालेयस्य ज्ञानघस्रे निलीय ॥५॥

अनारब्धास्तब्धप्रकृतिविकृतिभ्रंशपरता-
मिवादाय द्रव्यं व्ययजननवद् ध्रौव्यकलितम् ।
गुणैः पर्यायैर्वा पृथगथ विशुद्धं परिलस-
त्स्वरूपाभेदेन प्रतिफलति चास्तित्वविवृतम् ॥६॥

---

१-२ = तदी २.१ । ३-५ = तदी २.२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यं तद् व्ययमानमत्र विगतप्राचीनयाऽवस्थया
व्युत्पादेन तदुत्तरप्रगुणया व्युत्पद्यमानं ततः ।
ध्रौव्यालम्बितमीक्ष्यतेऽभ्युपगतस्वावस्थितावस्थया
न स्वारूप्यमिदं जहाति निजकं नोज्झत्यवस्थान्तरम् ॥७॥

उपात्तमलिनावस्थं निर्मलावस्थयोदितम् ।
उत्तरीयमिव द्रव्यं तेनोत्पादेन लक्ष्यते ॥८॥

मलिनावस्थया तच्च व्ययमानं व्ययेन तत् ।
ध्रौव्येणावस्थितावस्थमभिन्नं स्वस्वरूपतः ॥९॥
तथाविधस्वरूपस्यावस्थायामवलम्बते ।
स्वस्वरूपमभेदेन स्वरूपेणोत्तरीयवत् ॥१०॥

गुणैर्विस्तारसामान्येतररूपात्मकैः सह ।
स्वरूपभेदमादत्ते द्रव्यान्वयविवर्तिभिः ॥११॥

तदायतविशेषात्मरूपैः पर्यायवर्तिभिः ।
तन्तुभिर्लक्ष्यते तद्वदुत्तरीयमिदं तथा ॥१२॥
स्वरूपास्तित्ववद्भावः स्वभावोऽनन्यसाधनात् ।
अनाद्यनन्तताहेतुरूपवृत्त्या विवर्तनात् ॥१३॥
विभावधर्मवैधर्म्यात् स्वस्वभावविभावनात् ।
नानात्वेऽपि प्रदेशानां भेदाभावात् सहैकता ॥१४॥

तद्द्रव्यगुणपर्यायभेदानां भिन्नता न हि ।
परद्रव्यान्तराणीव सापेक्षत्वात् परस्परम् ॥१५॥
तेषामस्तित्वमस्त्येकमेव तत् कलधौतवत् ।
द्रव्यादिना पृथग् द्रव्याल्लभ्यन्ते न गुणादयः ॥१६॥
पीतादिगुणरूपैस्तु पर्यायैः कुण्डलादिभिः ।
काञ्चनस्य यदास्तित्वं स स्वभावः प्रकाशितः ॥१७॥
तत्स्वरूपमुपादाय तैरस्तित्वमुदीरितम् ।
तेभ्योऽपार्थक्यरूपस्य द्रव्यस्य कनकस्य च ॥१८॥

६-१२ = तदी २.३ । १३-२२= तदी २.४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलसाधनताभूतैरुत्पादितसदस्तिवत् ।
कुण्डलाङ्गदपर्यायपीततागुरुता ततः ॥१९॥

ध्रौव्योत्पादव्ययानां यत् स्वरूपमनुवर्तयन् ।
गुणैः पर्यायभेदैरप्यभिन्नं सत्त्वमस्य हि ॥२०॥

अधिकरणकर्तृकरणैर्भाव्यं निष्पादितस्य निष्पत्त्या ।
सद्वृत्तिविवर्तमानप्रवृत्तियुक्तैः सदस्तित्वम् ॥२१॥

अस्तित्वं हि सतोऽसतो न च भवेन्निष्पादितं तैरत-
द्भिन्नैर्भावमपेक्ष्य साधनतया साध्यं न चैवान्यथा ।
तत्तद्भावमनुज्झदुज्झितपरद्रव्यान्तराडम्बरं
वल्गत्युद्धतमुद्धतं त्रिजगतामन्तर्बहिः सर्वतः ॥२२॥

प्राग्वैचित्र्यकृतप्रपञ्चरचनाचातुर्यतुर्याऽनया
कल्पिद्रव्यपटः पटीयसि गुणस्तोमे ततस्तन्यते ।
सादृश्यस्तिमितास्तितास्तमिततद्वैचित्र्यचित्रः पटः
सामान्यानुभवात् सदस्ति सकलद्रव्यं प्रतीत्याऽञ्चति ॥२३॥

एकमेवावबोद्धव्यं सत्परिच्छेदनं सतः ।
बहुव्यापकसामान्यात् सर्वद्रव्येषु कल्पते ॥२४॥

यद्येवं न तदा किमस्ति सदसत् किञ्चित् कचिन्नास्ति सत
सद्वाच्यमिति प्रभेदभिदुरैरुद्भिद्यते सद्गिरिः ।
सर्वं विप्रतिषिध्यते न च तथासाध्यं विशेषाजह—
त्सामान्येन समुत्थितः पथि परानुत्थाप्य नानात्मके ॥२५॥

यथाऽनोकहरूपाणां सादृश्यास्तिप्रसङ्गतः ।
एकत्वमत्र नानात्वं स्वस्वरूपास्तिताबलात् ॥२६॥

तथा बहूनां द्रव्याणां सादृश्योद्भासितैव सत् ।
एकत्वमपि नानात्वं स्वस्वरूपास्तिसंभवात् ॥२७॥

यदुच्चकास्ति नानात्वमनानात्वं परस्परम् ।
तिरोधायाविरोधेन समुत्तिष्ठति निष्ठितम् ॥२८॥

---

२३–२८=तदी २.५।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अनादिनिधनद्रव्यमीक्षते* नान्यसाधनम् ।
स्वभावसिद्धिसंसिद्धमद्भुतं धाम चेष्टते ॥२९॥

कादाचित्कत्वान्न पर्यायो द्रव्यान्तरमपेक्षते ।
गुणपर्यायनिष्ठं तदेकमेवोपपद्यते ॥३०॥

द्रव्यं स्वभावतः सिद्धं सदित्यपि तथा पुनः ।
द्रव्यादर्थान्तरं नैव सत्तोत्पत्तिः प्रपद्यते ॥३१॥

समवायेन सत्तायाः सद् द्रव्यं नार्थभिन्नता ।
द्वयोस्तु युतसिद्धस्यासम्भवाद् दण्डदण्डिवत् ॥३२॥

न चाप्ययुतसिद्धत्वेनोपपद्येत वस्तुता ।
इहेदमत्र निष्ठा चेत् प्रतीतिः किंनिबन्धना ॥३३॥

यदि भेदं निबध्नाति भेदः को नाम कथ्यताम् ।
यदि प्रादेशिको नैष युतसिद्धापसारणात् ॥३४॥

स्यादताद्भाविकः शिष्टो द्रव्यं तन्न गुणो मतः ।
न चैकान्तेन बध्नाति प्रतीतिमिदमत्र यत् ॥३५॥

शुभ्रो गुणोऽस्ति वस्त्रस्य स्यादताद्भाविकोऽपृथक् ।
स्वयमुन्मज्जति स्वैरं द्रव्यं गुणवदित्यतः ॥३६॥

उत्तरीयमिदं शुभ्रं द्रव्यं द्रव्यतयार्पणात् ।
स्यादताद्भाविको भेदो निमज्जति समूलतः ॥३७॥

यत्रोन्मज्जति भेदविभ्रमभरस्तत्रायुतोन्मज्जनं
प्रोन्मज्जज्जलराशितो न च पृथक् कल्लोललोलायितम् ।
भेदे मज्जति मज्जति त्वयुतता द्रव्यं लसत् केवलं
स्वैरोन्मग्ननिमग्नतामुपगतं सद्द्रव्यमेवं ध्रुवम् ॥३८॥

द्रव्यं निजस्वभावे सदस्ति सर्गस्थितिप्रलयतायाः ।
ऐक्यात्मकपरिणामः स्वभाव इति निगदितस्तस्य ॥३९॥

यथा द्रव्यस्य विष्कम्भक्रमव्यापारवर्तिनः ।
सूक्ष्मांशास्तु प्रदेशाः स्युर्द्रव्यवृत्तेः समन्ततः ॥४०॥

---

* 'कादाचित्कत्वात् पर्यायो न द्रव्यान्तरमीक्षते' इति प्रतौ टिप्पणम् ।
२९–३८=तदी २.६ । ३९=प्रसा २.७ । ४०–४४=तदी २.७ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवाहक्रमसंवृत्ताः परिणामात् सदाऽणवः ।
अन्योन्यव्यतिरेकेण विष्कम्भस्तन्निबन्धनः ।
प्रदेशपरिणामानां प्रवाहस्य क्रमः सदृक् ॥४१॥ षट्पदी ।

स्वरूपपूर्वरूपाभ्यामुत्पन्नोत्सन्नता क्रमात् ।
निजस्थाने प्रदेशास्ते परिणामात् तथा मताः ॥४२॥

अन्योन्यसंवलितवस्तुतयैकयाऽपि
सर्गस्थितिप्रलयतो ननु धारयन्ति ।
त्रैधात्मकं निजमसङ्करदोषवृत्त्या
सर्वे प्रदेशपरिणामविशेषरूपाः ॥४३॥

मुक्ताप्रालम्बलम्बिज्वलदमलगुणा मुक्तमुक्ताफलानां
पूर्वेषामप्रकाशोदयनमुदयनादुत्तरेषां प्रभायाः ।
सर्वेषां चाकचिक्यं सममसमतया पूर्वबाधः परेण
त्रैधैक्यं निर्विशेषात् तदिव परिणतेः स्यादनुस्यूतिरस्य ॥४४॥

सर्गः संहृतिमन्तरा न घटते नासौ तमप्यन्तरा
नैतावप्यचलात्मकस्थितिविनाभूतौ न चेयं तयोः ।
भिन्ना सृष्टिरिवास्ति संहृतिरपि सृष्टिः स्थितिर्यौ पुन-
स्तावेव स्थितिरत्र नैव घटतेऽन्योन्याविनाभाविताम् ॥४५॥

सर्गः कुम्भस्य यस्सैव मृत्पिण्डस्यास्ति संहृतिः ।
भावस्यान्यतराभावस्वभावेनावभासनात् ॥४६॥

यो मृत्पिण्डस्य संहारः सर्गः कुम्भस्य स ध्रुवम् ।
अभावस्यान्यवद्भावस्वभावेनावभासनात् ॥४७॥

यौ कुम्भ-पिण्डयोः सर्ग-संहारौ सा मृदः स्थितिः ।
तन्मुख्यव्यतिरेकेणान्वयस्यैव प्रकाशनात् ॥४८॥

या ते मृदः स्थितिः कुम्भ-पिण्डयोः सर्ग-संहृती ।
तयोस्तु व्यतिरेकाणामन्वयस्यानतिक्रमात् ॥४९॥

सर्गं मृगयमाणस्य केवलं भिन्नमन्यतः ।
आदानकारणाभावाद् घटस्याभवनिर्भवेत् ॥५०॥

---

४५=प्रसा २.८ । ४६-५७= तदी २.८ ।

अथ स्यादसदुत्पादः कुम्भस्याभवनौ ततः ।
सर्वेषामेव भावानां भवेदभवनिः स्फुटम् ॥५१॥

गगनेन्दीवरादीनामसतां जननिस्तदा ।
मृत्पिण्डस्याप्यसंहारकारणाभावनावतः ॥५२॥

असंहरणिरेव स्याद् भिन्नसंहारकारणात् ॥
सर्वेषामेव भावानामसंहरणिरञ्चति ॥५३॥

उच्छेदः संविदादीनां सदुच्छेदेऽथवा भवेत् ।
व्यतिरेकसमाक्रान्तस्थितेरन्वयशून्यतः ॥५४॥

मृत्तिकाया यदस्थानिः प्राप्तायाः केवलस्थितिं ।
सर्वेषामेव भावानामस्थानिरुपपद्यते ॥५५॥

सति क्षणिकनित्यत्वे चित्तस्य क्षणनित्यता ।
सत्सु क्षणिकभावेषु द्रव्यशून्यप्रसङ्गता ॥५६॥

उत्तरोत्तरतरव्यतिरेकसृष्टितः प्रथमसंहतिरूपात् ।
स्वान्वयस्थितिमवस्थितमेतत् त्रितयाङ्कितमभिद्रवतीति ॥५७॥

उत्पादस्थितिभङ्गभेदरचना पर्यायमालम्बते
सद् द्रव्यं समुदायिनः समुदयाभेदादिदं शाखिवत् ।
शाखाभिर्भवनं गता ध्रुवतया बीजाङ्कुरानोकहा-
वस्थाभिः प्रतिभाति केवलमसद्भिन्नैरभेदस्ततः ॥५८॥

अवतरति हृदयभूमिं क्षणभेदस्तर्क्यमाण एव सदा ।
तदपि च तत्क्षणवर्ति द्रव्यं तत् त्रितयसमवेतम् ॥५९॥

दण्डभृद्दण्डचक्राद्यारोप्यमाणाङ्गसन्निधौ ।
यो मृत्पिण्डस्य सर्गस्य क्षणो नाशस्य स कश्चित् ॥६०॥

कोटिद्वयाधिरूढस्य मृत्तिकात्वस्य स स्थितेः ।
तथान्तरबहिरङ्गानां साध्यसाधनसन्निधौ ॥६१॥

उत्तरप्राक्तनानां च जन्मनाशक्षणावुभौ ।
कोटिद्वयाधिरूढस्य द्रव्यत्वस्य स्थितिक्षणः ॥६२॥

५८–६३ = प्रसा २. ९–१०, तदी २. ९–१०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्धमानमृदोऽन्तःस्थान्युत्पादादीनि सैव मृत् ।
न च वस्त्वन्तरं तद्वद् द्रव्यमेव निरन्तरम् ॥६३॥

शुद्धद्रव्यविमर्शनेन च निजद्रव्यं न जातं न वा
नष्टं शिष्टतरस्वरूपमचलं शुद्धस्वभावस्थितम् ।
भिद्यन्ते किल पर्ययास्तदसमा द्रव्यस्य गत्यादिभि
र्भेदैर्भङ्गभवध्रुवात्मकतया द्रव्यत्वमेकं पृथक् ॥६४॥

एकः शुद्धनयेन चित्परिणतद्रव्यार्थिकेन स्फुटं
नित्यो नित्यतमैकवस्तुविलसद्विज्ञानदुग्धाम्बुधिः ।
पर्यायाः प्रलयं व्रजन्तु यदि वा प्रादुर्भवन्तु स्वयं
कल्लोला इव नाहमस्मि सहजज्ञानैकलीनोऽच्युतः ॥६५॥

न स्यात् सद् द्वितयीगतिर्भवदसत् सत्तास्वरूपात् पृथक्
तत्रासद् ध्रुवसर्गतोऽजननितः स्वात्मानमस्थापयत् ।
द्रव्यं व्यस्तसमस्तमस्तमयति स्यात् सत्तयोः संभवा-
दात्मानं परिबिभ्रदुद्गमयतात् सत्तामथोद्गच्छतु ॥६६॥

प्रविभक्तप्रदेशत्वं तत् पृथक्त्वस्य लक्षणम् ।
न सत्ता-द्रव्ययोरस्ति जातु शुक्लोत्तरीयवत् ॥६७॥

भवति यदपि सत्ता-द्रव्ययोरन्यता चेद्
गुणगुणिवदनेकं स्यादतद्भावभावात् ।
उदितगुणविशेष्यं द्रव्यमन्यस्वरूपा
स्फुरति विदितसत्ता नैकमेकान्तवृत्त्या ॥६८॥

स्रग्दाम हार इति सूत्रमिति स्फुरन्ति
मुक्ताफलानि यदिति त्रिविधं विधानम् ।
शुक्लो गुणः स च न तानि न तानि स स्याद्
इतीतराश्रयविनाभवने परत्वम् ॥६९॥

---

६४=प्रसा २.११, तदी २.११ । ६६= प्रसा २.१३, तदी २.१३ ।
६७-६८= प्रसा २.१४, तदी २.१४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यं तन्न गुणो गुणो न तदिति स्यादप्यतद्भावता
न द्रव्यव्यतिरिक्त एव हि गुणो नैतत् तदाभासकम् ।
नैवं चेदुभयोरपोहपरता शून्यत्वमप्येतयो-
रेकत्वं प्रवितर्क्यतर्कितमतिर्द्रव्याविरुद्धं भजेत् ॥७०॥

सत्स्वभावमधितिष्ठति तस्मात्
सोऽपि तत्परिणतिर्गुण एव ।
अस्तिताऽस्ति सत इत्यनुवृत्त्या
सिद्ध्यतीह गुणता गुणवत्ता ॥७१॥

न जातु गुणपर्यायौ भवेतां द्रव्यतः पृथक् ।
ततस्तद्भवनेनैव सत्ताऽस्तु स्वयमेव तत् ॥७२॥

प्रादुर्भावमनाद्यनन्तमसकृत् सत्तानिबद्धं लसेत्
पर्यायाद्यभिधेयतासु तदसद्भावे निबद्धा स्थितिः ।
तस्मादस्त्वविरोधता सदसतोरुत्पादभेदस्य सद्-
भावोऽस्त्यन्वयशक्तिभिस्तदितरव्यक्तीस्तु सङ्क्रामतः ॥७३॥

न चाङ्गदादिपर्याया हेमैवान्वयशक्तिभिः ।
तदन्यव्यक्तिसङ्क्रामाद्धेम्नः सद्भावता स्फुटम् ॥७४॥

न द्रव्यं खलु पर्ययानुभवनात् पर्यायनिष्पादक-
व्यक्तित्वेन यदन्वयाङ्कितजसच्छक्तीस्तु सङ्क्रामतः ।
द्रव्यासद्भवनप्रभूतिरभवच्चेद(चेदङ्)गदाधानत-
द्धेम स्वव्यतिरेकतापरिलसद्व्यक्तित्वनिष्पादनात् ।७५॥

व्यतिरेकानुकारिण्यो व्यक्तयोऽन्वयशक्तिताम् ।
प्रपन्नाः प्रर्ययानेव द्रव्यीकुर्युर्यथाऽङ्गदः ॥७६॥

व्यतिरेकत्वमापन्ना द्रव्यमन्वयशक्तयः ।
पर्यायीकुर्युरासाद्य क्रमवृत्तिं हिरण्यवत् ॥७७॥

द्रव्यार्थादेशतस्तस्मादुत्पादस्तु सतो मतः ।
पर्यायादेशतः सत्यमुत्पादोऽसत इष्यताम् ॥७८॥

---

६९=तदी २.१५ । ७०=प्रसा २.१६; तदी २.१६ ।
७१ = प्रसा २.१७, तदी २.१७ । ७२ = प्रसा २.१८, तदी २.१८ ।
७३-७८ = तदी २.१९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यं तावदनुज्झदन्वयमयीं शक्तिं सदेवास्य या
पर्यायव्यतिरेकविस्फुरणताविर्भावताऽस्यामपि ।
द्रव्यस्यान्वयशक्तितोऽच्युतिरनन्यद्द्रव्यमेव ध्रुवं
निश्चीयेत ततः सतो ननु सदुत्पादो ह्यनन्यत्वतः ॥७९॥

पर्यायदुर्ललितवृत्तिरवश्यमेव
द्रव्यस्य भाविनि भविष्यति तेन भूत्वा ।
स्वामन्वयाङ्कुरितशक्तिमनुज्झदेतद्
द्रव्यं भवन् कथमतोऽन्यतमोऽस्ति जीवः ॥८०॥

नामर्त्यः खलु मर्त्यतामुपगतो मर्त्यो न चामर्त्यतां
सिद्धोऽसिद्धतया स सिद्ध इति वाऽनन्यः कथं चान्यतः ।
पर्यायाः समये निजे यदि तदा सन्तोऽप्यसन्तोऽन्यतो
द्रव्यस्याप्यपृथक्तयानुभवतः स्याद् वाऽसदुत्पादता ॥८१॥

येन जातमनुजादिभवत्वं
द्रव्यमन्यदिह जातु न स्यात् ।
जायमानवलयादिविकारं
कान्तकाञ्चनमिव प्रतिभाति ॥८२॥

यैः सामान्यविशेषजन्यविधिना द्रव्यार्थिकं वस्तुतः
पर्यायार्थिकमाकलय्य युगपद् द्वैतं समालोक्यते ।
यद्येकान्तनिमीलितः स्फुरति तत् पर्यायभेदक्रमः
शुद्धद्रव्यनिमीलने तदपरः प्रोन्मीलतेऽन्यत्ववत् ॥८३॥

सर्वावलोकनतया प्रतिषिध्यते न
चक्षुर्द्वयेन यदि दर्शनमेकवेलम् ।
अन्यत्वमस्य यदनन्यतमत्वमेक-
चक्षुर्दशा भवति चैकदिशावलोकः ॥८४॥

स्यादस्त्येव सतः स्वरूपभवनान्नास्त्येव यद्वाऽसतोऽ-
न्यस्मादेतदवाच्यमेव युगपत् स्यादस्ति नास्त्येव यत् ।
स्वान्याभ्यां क्रमतोऽस्त्यवाच्यमभितः स्यान्नास्त्यवक्तव्यव-
चान्यस्वान्यसमत्वतोऽस्ति न च वा वक्तव्यमेतैः समैः ॥८५॥

---

७९–८२ = तदी २.२०–२१ । ८३–८४ = तदी २.२२ । ८५–८७ = तदी २.२२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत् स्वतोऽस्ति पररूपतोऽप्यसत्
स्वान्यतो भवति वक्तुमक्षमम् ।
सप्तसप्तिरिव सप्तभङ्गिका
स्तोममूहतमसामुदस्यति ॥८६॥

इत्येवं नयसङ्ग्रहग्रहसमावेशः समादेशय-
त्यन्येषामनुभूतिमभ्रमभृते स्वद्रव्यतायाः पृथक् ।
स्यात्काराङ्कितविक्लवक्लमतमव्यासादिवासादय-
न्नात्मारामममनन्तधामपरमव्याकोशितान्तर्दशा ॥८७॥

विशेषसंविदनुभूतिप्रपञ्चो निष्क्रान्तः । अथ प्रविशति क्रियाकारणं कर्म ।

जीवस्यानादिकर्मप्रचयपरिचयस्पन्दनेन क्रियेयं
निर्वृत्तैवास्ति नित्यं निजसहजरसोन्मज्जदत्यन्तवृत्तिः ।
टङ्कोत्कीर्णस्वभावः क्वचन न च पृथक् पर्ययेभ्योऽभितः प्राग्
मोहात् साफल्यमेति द्वितयपरिणतेरुत्तरा निष्फलैव ॥८८॥

क्रिया फलवती यदि स्फुरति हेतुभूतात्मनः
शुभान्यतरकर्मणां प्रकृतिभिः स्वकार्यं तदा ।
ननु प्रचुरपर्यया: समभियोगसंयोगतः
स पुद्गलनटोद्भटो नटति नानटीति स्फुटम् ॥८९॥

यावन्नामगुणादिपर्ययपरिच्छेत्ता न तावत् स्वभा-
वान्तर्भावविभावलुण्टनपटुर्ज्ञानोपलम्भादृते ।
स्वैरोज्जागररङ्गसङ्गमरसास्वादादनास्वादय-
न्निस्तन्द्रापरभावलावणरसं निःश्वस्य विश्राम्यति ॥९०॥

कश्चिज्जातु न जायते किमपि न प्रक्षीयते तत्त्वतः
पर्यायाः क्षणभङ्गभङ्गुरतरा गङ्गातरङ्गा इव ।
यस्तेषां खलु संभवः स विलयप्रादुर्भवः संभव-
त्यन्योन्यं घटकुम्भयोरिव मृदोऽनेकत्वमेकत्ववत् ॥९१॥

---

८८ = तदी २. २४ । ८९=तदी २.२५ । ९१=प्रसा २.२७; तदी २.२७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्यायाद्यनवस्थितोऽपि स निजद्रव्योदयावस्थितो
नाना संसरतः क्रियापरिणतौ द्रव्यस्य मोहोदयात् ।
संसारः स निगद्यते भवभवाभेदेन संभाव्यतां
प्राचीनोत्तरनिर्विभागमहिमा चैतन्यचण्डद्युतिः ॥९२॥

आत्मा कर्ममलीमसः परिणतिं लब्ध्वा यतः कर्मणः
कर्माश्लिष्यति नूतनं परपरीणामो हि हेतुस्ततः ।
कर्ताऽऽत्माऽऽत्मनि कर्मणां परिणतेः कर्तृत्वभावादयं
स्यादेषामुपचारतः किल तदा बन्धस्य सिद्धिर्ध्रुवम् ॥९३॥

आसंसारभवद्रव्यकर्मकालुष्यभाविते ।
कार्यकारणभूतस्य कर्मणः कर्तृताऽऽत्मनि ॥९४॥

स्यात् कर्ता परिणामतः स्वयमयं तस्मादनन्यत्वतः
कर्तृत्वेन विवक्षितः परिणतिः सा तन्मयी तत्क्रिया ।
सा कर्मैव निजात्मनानपगता प्राप्या स्वतन्त्रेण वा
तस्माद्भावकलङ्कपङ्करजसां कर्ता परेषां न हि ॥९५॥

उपचारात् क्रिया कर्म कर्तृणामेव रूपतः ।
आत्मा कर्ताऽऽत्मभावानां पुद्गलः पुद्गलात्मनाम् ॥९६॥

क्रिया निष्क्रान्ता । अथ चित् त्रिपात्रीभूय प्रविशति ।

तस्मादात्मा परिणमति चेच्चेतनायां निजायां
सापि त्रेधा विदितविशदज्ञानपूरे महिम्नि ।
कर्मण्येका तदनुगफले नातिवर्तेत चित्रं
भेदाभेदभ्रमविरहितश्चेतनैवायमात्मा ॥९७॥

पदार्थानां ज्ञानं मुकुरहृदयाभोग इव यो
विकल्पस्तत्कर्म स्वयमपि विधेयं विधिवशात् ।
सुखं वा दुःखं वा फलति सुकृतं दुष्कृतमपि
त्रिधा चैतन्यात्मन्यवतरति निश्चित्य चितिचित् ॥९८॥

९२ = तदी २.२८ । ९३ = प्रसा २.२९, तदी २.२९ ।
९४-९६ = तदी २.३० । ९७ = प्रसा २.३१, २.३१ । ९८ = तदी २.३२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुद्धद्रव्यनिरूपणार्पितदृशा प्रत्यात्मवेद्यं त्रयं
ज्ञानं कर्म च तत्फलं परिणतिः सा चेतनैवात्मनः ।
द्रव्यान्तःप्रलयात् त्रयस्य परतोऽसम्पर्कतश्चिन्मयो-
भूयोन्मेषनिमेषदोषविकलः संक्रीडते स्वेच्छया ॥९९॥

य कर्तारमथो मिथोऽपि करणं कर्मापि तद्वत् फलं
निश्चित्यैकमिवात्मनाऽऽत्मनि मुनिः स्वात्मानमात्मीयति ।
नान्यद् द्रव्यमुपाददाति निरतः स्वद्रव्यमव्यञ्जितं
चान्यैः पुण्यमनन्यजन्यमहिमस्वं धाम संधावति ॥१००॥

अथैकपात्रीभूय चित् प्रविशति ।

अहह ! विविधबन्धोपाधिनिर्बाधितात्मा
स्फटिकमणिरिवान्यै रञ्जितस्वात्मवृत्तिः ।
अहमिह न च कस्य स्यान्ममान्यो न कश्चिद्
यदहमहमिहैको निर्विकारोऽहमस्मि ॥ १०१॥

स्वयमयमहमेकः स स्वतन्त्रोऽस्मि कर्ता
करणमहमिहाऽऽसं चित्स्वभावेन तेन ।
चिदनुगपरिणामं प्राप्य कर्माऽहमासं
तदहमह(ध)मदेहव्यूहमोहाभ्युपायः ॥१०२॥

न च खलु मम सौख्यं तद्विपर्यस्तदुःखं
प्रकृतिजनितमेतद् द्वैतमद्वैतरूपः ।
स्वयमियमनुभूतिश्चिच्चमत्कारिता या ।
प्रतिपतति निजान्तःपातिनी ह्लादिनी च ॥१०३॥

इदानीमुन्मज्जत्सहजनिजरङ्गप्रसरणा-
दपाकृत्याकृत्यप्रकृतिविकृतं रञ्जनमसत् ।
स्वभावाविर्भावादनुभवति रोधाय परितः
परद्रव्याकाङ्क्षां क्षणमिदमभिक्षाल्य चिरम् ॥१०४॥

विरोधिबन्धविध्वंसविस्फुरच्छुद्धबोधतः ।
शुद्धभावोऽस्मि चिद्रूपः परमात्मा निरञ्जनः ॥१०५॥

---

९९=तदी २.३३ । १००=प्रश २.३४, तदी २.३४ । १०१–११२ = तद २.३४ ।

स्वतन्त्रः कर्ताऽहं चितिपरिणतः साधकतमः
स्वभावेनानन्यः करणमहमस्मीति विमृशन् ।
स्वयं प्राप्यः कर्माऽहमहमहमेकोऽस्मि फलम-
प्यतज्जन्यं सौख्यं मम परममन्यन्न किमपि ॥१०६॥

एवमस्य परमात्मनो भृशं
बन्धमोक्षपथपद्धताविव ।
भावितस्य मिलितं क्वचित्
परद्रव्यमात्मनि न जातु जायते ॥१०७॥

एकाग्रोन्मुखभावनापरिणतद्रव्यं न संपृच्यते
शुद्धं तत्फलकर्तृकर्मकरणैर्भेदैर्न संकीर्यते ।
तस्मादुद्धतशुद्धबोधविबुधोपालब्धबन्धोद्धुरा-
बोधः शुद्धतमैकधामनि परब्रह्मैकतामेधते ॥१०८॥

सर्वद्रव्यनिवर्तनात् प्रववृतेऽसदगर्वसर्वंकषः
सामान्यात्मविशेषपक्षमभितः स्वीकारमाविर्दधत् ।
शुद्धद्रव्यसमाश्रितैकनयतामालम्ब्य कर्मादिमद्-
भेदभ्रान्तिविनाशनादुपरतो मुक्तश्चिति स्थास्यति ॥१०९॥

निरुपमसुखमोपमेयसौख्य-
च्छलसच्छायचिदुच्छलज्जलेषु ।
सदसद्भवनादिवेदमन्तः
स्वयमुन्मग्ननिमग्नमुच्चकास्ति ॥११०॥

एकः संविन्मात्रभावोऽहमस्मि
नैको ज्ञानं दर्शनं चाहमस्मि ।
एकानेकत्वं प्रतिक्रम्य सर्वं
ज्ञेयज्ञानज्ञायकः सोऽहमस्मि ॥१११॥

उच्छेद्यावद्यविद्यामिदमुदितमुदारावतारे महिम्नि
प्रभ्रष्टे कर्तृकर्मभ्रमभरभरितावस्थदुःस्थप्रभेदे ।
चैतन्यानन्दपूरप्लवनमनुसरन्नस्ततन्द्रः परेभ्यो
व्यावृत्त्याशेषदोषोपरत इव तरामुज्जजागार जाग्रत् ॥११२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति तत्त्वार्थविज्ञानं **पद्मसुन्दर**सूचितम् ।
चमत्करोति नो कस्य चेतश्चिल्लीनचेतसः ॥११३॥

आनन्दामृतपूरपूर्णजलधिप्रोन्मज्जदच्छच्छद-
च्छन्नोपान्तनितान्तवान्तसदसत्प्रोद्भूतरत्नाकरः ।
विज्ञानोर्मिचिदुच्छलज्जलभरैरुद्वेलितो वेलया
च्छन्दोवारिनिवारणैः कथमथो बन्धैः समाबध्यते ॥११४॥

इति श्रीज्ञानचन्द्रोदयनाटके परमात्मविवरणे
चतुर्थोऽङ्कः पूर्णः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## पञ्चमोऽङ्कः ।

निष्क्रान्तश्चिद्विलासः अथ शब्दब्रह्मविशेषविलासः प्रविशति ।

कथञ्चिद् द्रव्येषु प्रतिचरितसामान्यविशद-
प्रबोधादुद्भूतस्तदितरगुणस्तत्प्रगुणितः ।
विशेषप्राग्भारः समवतरदुच्छिद्य परता-
मिहैकत्वव्यक्तिर्निजगुणनिरुक्तिं निगमयन् ॥१॥

सर्वैकत्वनिबन्धनं विचरते द्रव्यत्वसामान्यता
जीवाजीवतया विवेचितदृशा भेदो न वा भिद्यते ।
तद्भेदश्चिदचिद्द्वयस्य च मिथः स्याच्चेतनाचेतन-
व्यक्तीकारपरायणोऽभ्युदयते सोढा विशेषः परान् ॥२॥

धर्माधर्माकाशकालाणुरूपिद्रव्ये पञ्च व्यक्तयः सन्ति भिन्नाः ।
एका जीवव्यक्तिरत्यन्तभिन्ना संविन्मात्रा चेतनद्योतमाना ॥३॥

भिन्नाभिन्नाभावभावव्यपाया
नो भिद्यन्ते जातु जातेरभेदात् ।
शुद्धः शुद्धस्वस्वरूपप्रकाश-
व्यासक्तोऽयं चेतनापुण्यपुञ्जः ॥४॥

उत्पादस्थितिभङ्गभेदरचना जीवे तथा पुद्गले
सङ्घातादथ भेदतो द्वयमिदं भावक्रियावत् तथा ।
शेषाणां परिणाममात्रभवनाद् भावः परिस्पन्दना-
कारस्फारतरक्रिया प्रकृतितो द्रव्यास्तिताया बलात् ॥५॥

मूर्ता निजपरिस्पन्दभिन्नाः सङ्घातसंहताः ।
भेदेनोत्पद्यमानादिक्रियावन्तो भवन्ति यत् ॥६॥

जीवा निजपरिस्पन्दनवकर्मादिपुद्गलैः ।
भिन्नाः सङ्घातमापन्नाः क्रियावन्तस्त्रिधा मताः ॥७॥

लिङ्गानीह गुणास्तदाश्रयतया यैर्लिङ्ग्यते गम्यते
द्रव्यं तन्न गुणा गुणास्तदपि नो द्रव्यादतद्भाविनः ।
लिङ्गत्वं खलु लिङ्गलिङ्गिविवृतौ संसिद्ध्यति स्वेच्छया
जीवाजीवतदाश्रया ननु गुणा यैर्व्यज्यते द्रव्यता ॥८॥

---

१ = तदी २. ३५ (उत्थानिका) । २–४=तदी २.३५ । ५–७=प्रसा २.३७, तदी २.३७ । ८=प्रसा २.३८, तदी. २.३८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूर्तः पुद्गल एव तद्गतगुणा मूर्तास्तदाकारतो
वर्णाद्या निजविश्रसापरिणताः केचित् प्रयोगानुगाः ।
मूर्तातीतगुणास्त्वमूर्तसकलद्रव्येषु शेषेष्वतो
मूर्तामूर्तगुणप्रपञ्चचतुरश्चैतन्यचिन्तामणिः ॥९॥

मूर्तं पुद्गलजन्यमिन्द्रियभवज्ञानेन यद् व्यज्यते
शब्दो नापि गुणत्वमभ्युपगतो द्रव्यस्य पर्यायतः ।
यद्वाऽमूर्तगुणस्तदा गुणगुणिद्वन्द्वाविभक्तप्रदे-
शत्वेनैकतया स्वभावभवनाद् द्रव्यं तदा श्रावणम् ॥१०॥

कादाचित्कतया चकास्ति नियतं पर्यायतालक्षणं
शब्दो मूर्तगुणोऽपि तन्न गुणता नित्याऽस्ति तद्रूपिणः ।
यन्नित्यत्वमणुष्ववापि न च तच्छब्दे गुणादिष्वपि
स्यात्पक्षाय कृतो जलाञ्जलिरतः शब्दे गुणव्यापकैः ॥११॥

अब्ज्योतिर्मरुतामिवाप्रकटनात् स्पर्शादिमत्त्वस्य तत्
चन्द्राश्मारणिवेगतासु (?) च पटुस्पर्शादिमत्सु स्फुटम् ।
नानारूपतयाऽणुभिः परिणतेष्वेभिस्तदारम्भकैः
व्यक्ताव्यक्ततमत्वमस्ति नियतं पर्यायभेदेषु सत् ॥१२॥

कादाचित्कपरीणामवैचित्र्यप्रत्ययं न च ।
व्यक्ताव्यक्तत्वमेवास्ति गुणस्येति न संमतम् ॥१३॥

ततोऽस्तु शब्दः पर्यायः पुद्गलस्यैव नास्ति चेत् ।
नित्यद्रव्यस्वभावस्य प्रतिघाताय जायते ॥१४॥

आकाशस्यावकाशो गतिरिति नियता धर्मनामन्यधर्मे
स्थानत्वं हेतुरुक्तः समय इह गुणो वर्तनालक्षणत्वम् ।
जीवः शुद्धोपयोगाद्यनुभवभवनानन्यचैतन्यमूर्तिः
टङ्कोत्कीर्णस्वभावप्रसृमरसहजानन्दपूर्णाचलार्चिः ॥१५॥

---

९=प्रसा २.३९, तदी २.३८-३९ । १०=तदी २.३९-४० । ११-१४=तदी २.४० । १५=प्रसा २.४१-४२।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्परमसंभवद् भवति तद्गुणत्वं गुणि
ष्वनन्यतरमन्तरा गुणमसंभवस्तद्गताम् ।
ततो गुणविशेषतो गुणिविशेषता चेष्टते
स्वतोऽधिगमयत्ययं न परभावमादित्सति ॥१६॥

जीवो मूर्तो धर्माधर्मौ विहायः
सङ्ख्यातीतैः स्वप्रदेशैरभिन्नाः ।
कालाणुः स्यादप्रदेशस्तु ताव-
न्मात्रत्वेनानेकरूपो न तस्मात् ॥१७॥

शुद्धाकाशोऽनन्तरूपप्रदेशो
लोकाकाशापेक्षया सप्रदेशः ।
कालाणोस्तु द्रव्यजातप्रदेशं
व्याप्याद्वैतं तस्थुषः सप्रदेशः ॥१८॥

योऽभिव्याप्तो येन कालाणुनायं
शुद्धाकाशस्य प्रदेशस्तमेव ।
मूर्ताणुश्चातिक्रमन् मन्दगत्या
तन्मात्रः स्याद् द्रव्यकालस्य सूक्ष्मः ॥१९॥

पर्यायोऽयं तस्य स व्यञ्जकोऽर्थो
द्रव्यं प्रादुर्भावविध्वंसहीनम् ।
प्रादुर्भूतध्वंसरूपः समन्तात्
पर्यायोऽयं सूक्ष्मकालस्य संज्ञा ॥२०॥

आकाशस्य प्रदेशानामतिक्रमणतः समम् ।
साधयेन्न तदंशत्वं कालाणुस्तीव्रगाणुतः ॥२१॥

विभागः संभवत्येव नभोद्रव्ये प्रदेशतः ।
अविभक्तेऽपि सर्वेषां द्रव्याणां स्थानदानतः ॥२२॥

यद्यंशा न स्युरित्थं चेन्मतिः स्यादङ्गुलीद्वयम् ।
प्रसार्य कथ्यतामेकमनेकं क्षेत्रमस्ति किम् ॥२३॥

---

१६=तदी २.४१-४२ । १७=प्रसा २.४३, तदी २.४३ । १८=तदी २.४३ ।
१९-२१=तदी २.४७। २२-२७=तदी २.४८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिन्नांशाविभागैकद्रव्यत्वेनैकमस्ति किम् ।
किं भिन्नांशाविभागैकद्रव्यत्वेनैकमप्यथ ॥२४॥

आद्यश्चेदङ्गुले: क्षेत्रं तेन द्व्यंशाद्यभावतः ।
ततः प्रदेशमात्रत्वं परमाणोरिवाम्बरे ॥२५॥

चेद् द्वितीयोऽविभागैकद्रव्यस्यांशत्वमागतम् ।
अनेकं चेत् तदा सांशानेकद्रव्यत्वतः किमु ।
किं वानंशैकतारूपद्रव्यत्वेन यदादिमः ॥ २६ ॥ षट्पदिकेयम् ॥

द्रव्यस्यैकस्य तु व्योम्नोऽनन्तद्रव्यत्वमागतम् ।
चेद् द्वितीयोऽविभागैकद्रव्यस्यांशत्वमागतम् ॥२७॥

प्रदेशप्रचयस्तिर्यक्प्रचयः स निगद्यते ।
समयप्रचयस्तावदूर्ध्वप्रचयसंज्ञितः ॥२८॥

तत्राकाशादिपञ्चानां तिर्यक्प्रचयता मता ।
कालस्य न प्रदेशस्य शक्त्या व्यक्त्यैकरूपतः ॥२९॥

त्रिकोटिस्पर्शस्तूर्ध्वप्रचयः सांशताबलात् ।
द्रव्यवृत्तेस्ततः सर्वद्रव्याणामनिवारितः ॥३०॥

समयविशिष्टवृत्तिप्रचयः शेषेषु नियतमूर्ध्वप्रचयः ।
कालस्योर्ध्वप्रचयः समयप्रचयो नियत एव ॥३१॥

समयः समयार्थस्य वृत्त्यंशस्तत्र संभवः ।
प्रध्वंसश्च द्वयं चाणोर्भङ्गोत्पादस्य कारणात् ॥३२॥

चेद् वृत्त्यंशस्य तौ स्यातां यौगपद्येन वा क्रमात् ।
नाद्यः सममिहैकस्य द्वयोरनवतारतः ॥३३॥

न द्वितीयोऽस्ति वृत्त्यंश(? शः) सूक्ष्मत्वेनाविभागतः ।
ततः कोऽप्यनुसर्तव्यो वृत्तिमानात्मनिश्चयात् ॥३४॥

पदार्थः समयः स स्यात् तद्वृत्त्यंशे द्वयं समम् ।
यस्य वृत्तिमतो यस्तु वृत्त्यंशे यत्र संभवः ॥३५॥

---

२८-३१=तदी २.४९ । ३२-३८=तदी २.५० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स तस्य तत्र वृत्त्यंशे प्रध्वंसः प्राग्विशेषतः ।
यदि भङ्गभवावेकवृत्त्यंशे भवतस्तदा ॥३६॥
समयस्य पदार्थस्य स्यान्निरन्वयता कथम् ।
यतः पूर्वोत्तरांशाभ्यां युगपद् द्वयवर्तिनः ॥३७॥
स्वभावेनाप्यनुत्पन्नाऽप्रध्वस्तत्वादवस्थितः ।
एवमेकत्र वृत्त्यंशे समयार्थस्य तत् त्रयम् ॥३८॥
वृत्त्यंशेषु समस्तेषु समयार्थस्य तत् त्रयम् ।
एकस्मिन्नपि वृत्त्यंशे तस्य दर्शनतोऽस्ति हि ॥३९॥
सद्भावोऽस्तीति कालाणोर्विशेषास्तित्वसुस्थितेः ।
विना समानतास्तित्वमुपपत्तेरसंभवः ॥४०॥
अस्तित्वं तावदुत्पादव्ययध्रौव्यैकतात्मिका ।
न प्रदेशं विना वृत्तिः कालस्य खलु संभवेत् ॥४१॥
यतो वृत्तिमतोऽभावः प्रदेशाभवने सति ।
स तु शून्योऽस्तिसंज्ञाया वृत्तेरर्थान्तरत्वतः ॥४२॥
न वृत्तिः केवलैवापि कालो भवितुमर्हति ।
वृत्तिमन्तं विना वृत्तेरुपपत्तेरसंभवः ॥४३॥
उपपत्तिर्यदोत्पादव्ययध्रौव्यैकता कथम् ।
अनेकांशात्मकत्वेन पूर्वांशध्वंसतस्तथा ॥४४॥
उत्पादादुत्तरांशानामेकात्मध्रौव्यतोऽस्ति चेत् ।
नैवं भङ्गोऽस्ति यत्रांशे यस्मिन्नुत्पादता तयोः ॥४५॥
सहवृत्तेरभावत्वाद् द्वयोरप्येकता कुतः ।
सर्वथाऽस्तमितत्वेन प्रध्वस्तांशस्य भाविनः ॥४६॥
संभावितात्मलाभत्वाद् ध्वंसोत्पादैक्यवर्तिवत् ।
कुतस्त्यं ध्रौव्यमित्येवं सति नश्यति तत् त्रयम् ॥४७॥
उदेति क्षणभङ्गस्तु द्रव्यमस्तमुपैति तत् ।
क्षणेन क्षयिणो भावा उदीयन्ते निरन्तरम् ॥४८॥

---

३९–४०=तदी २.५१। ४१–५२=तदी २.५२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वविप्लवभयादिह कश्चिद्
वृत्तिमानपि तदाश्रयभूतः ।
सप्रदेश इममाश्रयणोयो
नाप्रदेशमनुगव्यतिरेकौ ॥४९॥

ततः प्रदेशमात्रं हि तद् द्रव्यसमयं यतः ।
पर्यायसमयः सिद्धयेत् तदतिक्रामतस्त्वणोः ॥५०॥

एकेनैव प्रदेशेन वर्तते प्रथमं ततः ।
अन्येनान्यतरेणापि प्रदेशेन ततो मतः ॥५१॥

स तिर्यक्प्रचयोऽप्यूर्ध्वप्रचयोभूय केवलम् ।
व्यवस्थापयति द्रव्यं तत्प्रदेशैकमात्रया ॥५२॥

तत् तिर्यक्प्रचयस्योर्ध्वप्रचयत्वमनिच्छता ।
द्रव्यं प्रथमतः स्थाप्यं प्रदेशमितमञ्जसा ॥५३॥

आकाशादिसमग्रलोकमखिलज्ञेयं विभज्य स्वतः
संवित्तिप्रविजृम्भितप्रकटितज्ञानेन बुध्वा स्फुटम् ।
ज्ञातृद्रव्यमनन्तसन्ततरसास्वादोन्मुखीभूय तद्
जोवत्वं यदिदं विविक्तममुना चैतन्यमातन्यते ॥५४॥

प्राणैर्जीवति यस्तु जीवितचरो जीविष्यतीति स्वयं
जीवो युक्तिनिरुक्तिमभ्युपगतः प्राणैस्तु सामान्यतः ।
यद्यस्त्येव तथापि पुद्गलजडद्रव्येण निर्वर्तित-
त्वादात्मा न घटामियर्ति तदते चैतन्यसंचेतनात् ॥५५॥

मोहादिप्रसरद्विभावकलुषत्वापत्तिमत्पुद्गल-
द्रव्योदश्चदपञ्चमाञ्चितचरप्राणैर्यतो जीवति ।
नैतद् युक्तनिरुक्तमुक्तमचलद्रव्यानुषङ्गप्रसङ्-
गानारोपितरूपचिद्गुणतया सम्यक् समालम्ब्यताम् ॥५६॥

यत्कर्ममलमालिन्यमलिनो मलमिच्छति ।
तत्त्वेषु ममताहेतुरन्तरङ्गो विधिर्बली ॥५७॥

---

५५=प्रसा २.५५, तदी २.५५। ५६=प्रसा २.५६–५७, तदी २.५६–५७ ।
५७=तदी २.५८।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदमेवात्र तात्पर्यं शुद्धये परमात्मनः ।
व्यवहारनयं हित्वा शुद्धनिश्चयमास्यताम् ॥५८॥

अन्तस्तत्त्वविवेचनेन च परद्रव्याद्युपाधौ बलाद्
उद्यन्मोहमपोह्य चिद्गुणलसच्छुद्धात्मसंसिद्धये ।
तं सद्भावनिबद्धमुद्धतनिजद्रव्यस्वभावोदय-
प्राग्भारेण परात्मताविभजनं प्रत्युद्यतो वल्गति ॥५९॥

आत्मा यद्युपयोगवानथ स च ज्ञानं तथा दर्शनं
चैतन्योभयरूपतोऽशुभशुभोऽशुद्धो द्विधा भिद्यते ।
शुद्धो निर्गुणनिर्विकारसहजानन्दात्मकस्यात्मनः
सद्भावस्तदभावतोऽभ्युगतः स्यात् सोपरागः सदा ॥६०॥

सर्वत्र परद्रव्ये मध्यस्थोऽहं भवामि निर्मुक्तः ।
आत्मन्युपयोगात्मनि नित्यं तिष्ठामि निश्चले महसि ॥६१॥

न मनो नाहं देहो न चापि वाणी न कारणं तेषाम् ।
कर्ता न न कारयिता कर्तॄणां नानुमन्ताऽस्मि ॥६२॥

पुद्गलमयो न चाहं मया न ते पुद्गलाः कृताः पिण्डम् ।
देहोऽहं न च तस्मादथ कर्ता तस्य देहस्य ॥६३॥

परमाणुप्रदेशः प्रदेशमात्रः स्वयं च यदशब्दः ।
रूक्षो यदि वा स्निग्धो द्वयादिकतामनुभवत्यसौ नाहम् ॥६४॥

एकोत्तराद्यनन्तावसानपरिणामिताणुवैचित्र्यात् ।
स्निग्धत्वं रूक्षत्वं परिणमति न चाहमस्मि तत्कर्ता ॥६५॥

द्विचतुर्गुणयोरुभयोस्त्रिपञ्चगुणयोस्तु मिश्रयोरथवा ।
बन्धप्रवृत्तिरेषा परमाणोर्नाहमस्मि तद्रूपः ॥६६॥

अञ्जनपूर्णसमुद्गकतुल्यः पुद्गलनिकायचयनिचितः ।
लोकस्तद्दलिकानां नाऽऽनेताऽहं पुराणपुरुषोऽस्मि ॥६७॥

---

५८= तदी २.५९। ५९ = तदी २.६२। ६०=प्रसा २.६३, तदी २. ६३। ६१=तदी २.६७। ६२=प्रसा २.६८। ६३=प्रसा २.७०। ६४=प्रसा २.७१। ६५=प्रसा २.७२, तदी २.७२। ६६=तदी २.७४। ६७=तदी २.७६।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवपरिणाममात्रं बहिरङ्गं साधनं समाश्रित्य ।
कर्मतयाऽणुस्कन्धाः संहन्यन्ते न कर्मकर्ताऽहम् ॥६८॥

देहान्तरसङ्क्रमणं जायन्ते कर्मतागताणुचयाः ।
स्वीकृत्य जीवपरिणतिमात्रनिमित्तं ततो न तनुकर्ता ॥६९॥

रसरूपगन्धवर्जितमशब्दमव्यक्तचिद्गुणमनन्तम् ।
जीवमलिङ्गग्रहणं संस्थानातीतमात्मना ध्यायेत् ॥७०॥

रूपातीतनिरञ्जनपरमात्माऽहं न चास्ति मम बन्धः ।
रागद्वेषादिभवः सम्बन्धो बन्धसाधकः सोऽस्तु ॥७१॥

शुद्धोपयोगिजीवः स्फटिकमणिरिवास्ति सोपरक्त भावात् ।
नीलादिपरप्रत्ययभावैर्बध्नाति बन्धमनवरतम् ॥७२॥

रागद्वेषविजृम्भितमोहप्रभवेन येन भावेन ।
पश्यति जानाति ततः सम्बध्यते सोपरागहेतुवशात् ॥७३॥

स्निग्धादिस्पर्शरसैरेकत्वगतः स पौद्गलो बन्धः ।
मोहादिकपर्यायैर्जीवस्य तथोभयोरुभयबन्धः ॥७४॥

पुद्गलकाया जीवप्रदेशकेषु स्फुरत्यपरिस्पन्दात् ।
तिष्ठन्ति प्रविशन्त्यपि गच्छन्त्यपि ते स्वयं च बध्यन्ते ॥७५॥

बध्यते रागपरिणत एवाऽऽगतकर्मणा न वैराग्ये ।
न च मुच्यतेऽनुरक्तोऽमुक्तश्चिरसञ्चिते न च विरक्तः ॥७६॥

ननु परिणामाद् बन्धः स च रागद्वेषमोहभावयुतः ।
मोहद्वेषावशुभौ शुभोऽशुभो वा भवति रागः ॥७७॥

परिणामोऽपि द्विविधो द्विधा विशिष्टः परोपरक्तत्वात् ।
अविशिष्टोऽनुपरक्तः परेषु स च सकलबन्धविध्वंसी ॥७८॥

---

६८=तदी २.७७। ६९=प्रसा २.७८, तदी २.७८। ७०=प्रसा २.८०, तदी २.८०। ७१=तदी २.८२। ७२=तदी २.८३। ७३=प्रसा २.८४, तदी २.८४। ७४=प्रसा २.८५, तदी २.८५। ७५=प्रसा २.८६, तदी २.८६। ७६=प्रसा २.८७, तदी २.८७। ७७=प्रसा २.८८। ७८=तदी २.८९।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षड्जीवनिकाया ये जीवादन्ये च ते परद्रव्यम् ।
स्वद्रव्यमेक एव स्वयमात्मा चिच्चमत्कृतः सततम् ॥७९॥

अहमिदमस्मि ममेदं भवति भविष्यति ममान्यदध्यासीत् ।
मोहादिहाध्यवस्यति मूढः स्वपरभावदुरभिज्ञः ॥८०॥

आत्मा कर्ता स्वस्वभावस्य तावत् कर्ता नायं सर्वभावान्तराणाम् ।
नैवादत्ते नापि मुञ्चत्यचित्त्वं मूर्तत्वान्तर्वर्तमानोऽप्यमूर्तः ॥८१॥

परिणमयिता यो यस्यास्ति स्वयं स तदाश्रयात्
स्फुरति तदुपादाने हानेऽप्यसौ हुतभुग् यथा ।
मिलित इव यः कर्माश्लेषैः पुराणपुमानयं
स्फुटमुपरतो हानादानादिवेति तदद्भुतम् ॥८२॥

यद्धाराधरतोयसिक्तधरणीसम्पर्कतः पुद्गलाः
तन्नीरन्ध्रसिलिन्ध्रभेकबलभिद्गोपादिभिर्भूरिभिः ।
भावैस्तु स्वयमेव ते परिणमन्त्येवं पुराणः पुमान्
रागद्वेषवशीकृतोऽशुभशुभैर्भावैः परीस्पृश्यते ॥८३॥

निष्कषायमिव नाम्बरं यतो
याति रञ्जनमिदं निरञ्जनम् ।
तत्कषायपरिघोलनाद्घने
रङ्ग एव लुठताद् बहिर्बहिः ॥८४॥

साध्यस्य साधकतमः पुनरत्र शुद्ध-
द्रव्यस्य शुद्धनय एव न चेतरस्तु ।
प्रद्योतयेदथ हिमद्युतिमङ्गभासां
प्राग्भार एव न च चन्द्रकलङ्कपङ्कः ॥८५॥

यदशुद्धनयाधीनद्रव्यं स्यात् तदशुद्धिमत् ।
परद्रव्येषु कुर्वाणो ममतां कुपथानुगः ॥८६॥

७९=प्रसा २.९०, तदी २.९०। ८०=प्रसा २.९१, तदी २.९१। ८१=प्रसा २.९२-९३, तदी २.९२-९३। ८२=तदी २.९३। ८३=तदी २.९५। ८५= तदी २.९७। ८६=प्रसा २.९८, तदी २.९८।

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

नाहं परेषां न च मे परे स्युः
ममायमात्माऽस्य यतोऽहमस्मि ।
स्वस्वामिसम्बन्धमपास्य शुद्ध-
ज्ञानैकपुञ्जोऽहमतो न किञ्चित् ॥८७॥

शुद्धात्मानमनाद्यनन्तमचलं सद्दर्शनालङ्कृत-
ज्ञानातीन्द्रियरूपचिद्गुणमनालम्बं परद्रव्यतः ।
व्यक्तं सद् ध्रुवमन्यदध्रुवमिति स्वद्रव्यमव्यञ्जिता-
न्यद्द्रव्यं निजधर्मताविभजनादेकं परेभ्यः पृथक् ॥८८॥

इत्थं शुद्धनयोद्धतध्वजपटो धुन्वन् परद्रव्यतो-
दञ्चद्रेणुकदम्बकं चलचलञ्चिन्मन्दवाताहतः ।
दृग्ज्ञानाङ्कितसौधशेखरशिखालब्धप्रतिष्ठस्तरा-
मानिष्कम्पचिदङ्कचारुमरुतः सानन्दमानन्दतात् ॥८९॥

रागद्वेषमुदस्य दस्युयुगलं तन्मूलमुन्मूलयन्
सर्वं वैषयिकं ततोऽधिकरणद्रव्यान्तराभावतः ।
क्षीराम्भोनिधिमध्यकेवलचलत्पोतस्थपत्रीव शु-
द्धात्माऽनन्यशरण्यपुण्यमनसो रोधाच्चिति स्थास्यति ॥९०॥

प्रवर्ते शुद्धात्मन्यनवरतमत्यन्तविगमात्
समस्ताकृत्यानां समरससमारब्धसहजः ।
स्वभावस्वादुत्वान्मम न ममताऽस्ति क्वचन
प्रवृत्तः स्वं सर्वंकषनिकषमन्तर्गतमहः ॥९१॥

उत्कीर्णलिखितकीलितमज्जितमूर्छितचिदङ्कबिम्बितवत् ।
मुद्रितचकितचमत्कृतरूपः शुद्धात्मनः स्वभावोऽहम् ॥९२॥

भूतैर्भाविभवद्भिरभ्युपगतं पर्यायभेदैः स्फुरज्-
ज्ञेयज्ञानविवेचकत्वसमुपात्तं वैश्वरूप्यं स्पृशत् ।
शुद्धानन्तचिदुच्छलत्कलनया यत्रैक्यरूप्यं महा-
गाधाबाधगभीरधीरमहिम स्वं संप्रपद्ये स्वयम् ॥९३॥

---

८७=प्रसा २.९९, तदी २.९९ । ८८=प्रसा २.१००, तदी २.१०० ।
९०=तदी २.१०४ । ९१-९३=तदी २.१०८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मव्यञ्जकशब्दपुद्गलमिलच्चेतःप्रवृत्तिस्फुरद्-
भेदज्ञानविधानसाधकतमप्रव्यक्तियुक्तः पुमान् ।
ज्ञप्तिस्तत्परमागमादपि भवेत् तस्मादुपात्तश्रुतः
संशेते न परप्रवादवचनैः स्वामात्मशुद्धिं दधत् ॥९४॥

ज्ञानज्योतिः स्फुरति परमार्थे न मे तावदासीत्
आसीदामि स्वजनजननात्मा ममानादिबन्धुः ।
आत्मन्नाद्यं जनकजननीपुत्रमित्रं कलत्रं
त्वाशुद्धिन्नं सपरमपरं न त्यजामि त्यजामि ॥९५॥

त्वमेव चरणं ममाचरणमप्युदग्रं तपः
त्वमेव मम दर्शनं त्वमवबोधरूपं मम ।
व्रतं समितिगुप्तिभिः सहितमन्तरङ्गश्रुतं
त्वमेव भगवांश्चिदुल्लसिततत्त्वमत्यद्भुतम् ॥९६॥

ज्ञातृज्ञेयपरत्वतत्त्वविलसत्पाण्डित्यशौण्डः पर-
द्रव्यान्तर्बहिरङ्गसङ्गतिपरित्यागात् स्वरूपे स्थितम् ।
तादृग्गुप्तसुषुप्तकल्पविदितान्तस्तत्त्ववृत्त्या मनाग्
अप्यासक्तिमनानयन्नुपरतश्चिद्रूपमुन्निद्रयेत् ॥९७॥

जानन्तोऽपि न जानन्ति भेदज्ञानपराङ्मुखाः ।
जानन्त एव जानन्ति परमात्मानमव्ययम् ॥९८॥

अज्ञानप्रविजृम्भणेन तमसा रज्जौ भुजङ्गभ्रम-
स्त्वज्ञानेन मरीचिकासु हरिणा धावन्ति पाथोधिया ।
अज्ञानेन विमोहितैकमनसां स्थाणौ मनुष्यभ्रमो
वातोद्वेलितवार्धिवद्धि मृशतां चेतो विकल्पीयति ॥९९॥

विज्ञानेनोष्णत्वमग्नेरिवाऽपां
शैत्यं सौरभ्यं लसत्पङ्कजानाम् ।
चैतन्योऽयं धातुरच्छस्वभावः
कर्मस्पन्दादेति कर्तृत्वभावम् ॥१००॥

---

९५=तदी३.२ । ९९=आत्म श्लोक ५८ (पृ० १६१)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानिनां ज्ञानकर्ताऽयमात्माऽन्यत्वस्य न क्वचित् ।
व्यवहारविमुग्धानां परभावस्य कारकः ॥१०१॥

विज्ञानजनिताः सर्वे ज्ञानिनां प्रस्फुरन्ति ये ।
अज्ञानजनिता भावाः स्फुरन्त्यज्ञानिनामिह ॥१०२॥

यो मुक्त्वा नयपक्षपातमखिलं हित्वा विकल्पावलीं
निक्षेपक्षपणेन विप्लुतपरद्रव्यादिभेदभ्रमः ।
अस्ता वस्तुसमस्तसंस्तुतिकथा विस्तारदौर्विध्यतो
निर्द्वन्द्वं भजते स्वरूपपरमब्रह्मैकधामाद्भुतम् ॥१०३॥

यत्र प्रमाणनयदुर्नयवाक्प्रपञ्च–
निक्षेपचक्रकथनक्रममस्तमेति
तच्चिच्चमत्कृतिनिरूपितरूपरम्यं
धामाद्भुतं जयति निर्वचनीयमुद्यत् ॥१०४॥

कर्म कर्मणि लसत्यपि कर्ता कर्तरि द्वयमिति प्रतिषिद्धम् ।
अस्तु वस्तु नियतं नियतात्मन्यञ्जितं विदि चिदुच्छलनेन ॥१०५॥

ज्ञानमस्ति विदि नाविदि विद्वन् कर्म कर्मणि च कर्तरि कर्ता ।
किं करोति न करोति च कः किं ज्ञानवानुपरतः परभावात् ॥१०६॥

ज्ञानिनामपि महानिह मोहो
मोहयत्यहमिहेति विकल्पात् ।
तत् कुतो भ्रमवतामवकाशोऽ-
ज्ञानिनामहितहेतुविमोहात् ॥१०७॥

चिद्विवर्तितनिवर्तितभिन्नद्रव्यसंवलनमुद्गलनेन ।
चिन्महश्चिति चिदुच्छलनान्तःपातिनातिचरति क्रमभूमिम् ॥१०८॥

ज्ञप्तिगुप्तिपरिवर्तितवृत्ति-
व्यञ्जिताञ्जनवियुक्तमयुक्तम् ।
पुद्गलादिभिरविभ्रमभावा-
दात्मसादलमलंचरिकर्ति ॥१०९॥

---

१००=आत्म श्लोक ६० (पृ० १६१) । १०१=आत्म श्लोक ६२ (पृ० १६२) ।
१०२=आत्म श्लोक ६६ (पृ० १९२) । १०३=आत्म श्लोक ७० (पृ० २०२) ।
१०५–१०६=आत्म श्लोक ९९ (पृ०२११)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकल्पगहनभ्रान्तश्चतुर्गतिपथस्थितः ।
रागद्वेषवशः पान्थस्तृष्णावान् मुह्यते न किम् ॥११०॥

तारतरामलमोहविलासः
शुद्धतमोद्धतबोधविशुद्धः ।
मज्जितमूर्तिनिरञ्जनपुञ्जः
कस्य चमत्कुरुते न हि चेतः ॥१११॥

उद्धतमोहतमोहननार्कः
किल्बिषभोगिनियन्त्रणमन्त्रः ।
तल्पितकल्पितजल्पविकल्पः
कस्य चमत्कुरुते न हि चेतः ॥११२॥

चिद्गतरङ्गतरङ्गितरङ्गः
शुद्धसुधारसपूरसमुद्रः ।
ज्ञानघनौघघनाघनकल्पः
कस्य चमत्कुरुते न हि चेतः ॥११३॥

सर्वं कर्मोशन्ति सर्वज्ञदेवा
बन्धस्यैतत् साधनं साधु नैव ।
तस्मात् सर्वं तन्निषिद्धं विरुद्धं
मोक्षोपाये कारणं ज्ञानमेव ॥११४॥

मग्नास्ते कर्ममूढाशयविवशलसद्भेदविज्ञानहीना
मग्नास्ते ज्ञानिनोऽपि स्वयमहमिकया च्छन्दमन्दोद्यमा ये ।
ज्ञानी भूत्वा समन्तादुपरि परिगता विश्वविश्वस्य साक्षात्
कर्मभ्यासात् प्रमादाचरणविरहिताः सन्ततं ते तरन्ति ॥११५॥

पुण्यापुण्यमिति द्वयं च सदसद्द्वैधं हि कर्मैव तद्
न्यक्कारात् किल कर्मणो निगदितो मोक्षो मुमुक्षोरिह ।
तन्नैष्कर्म्यविधिप्रधावितनिजाधीनप्रधानात्मज-
ज्ञानं मोक्षमुपानयत्यलमलं वैकल्पिकैः कर्मभिः ॥११६॥

११४=आत्म श्लोक १०४ (पृ २२०) ।
११५=आत्म श्लोक ९ (पृ० २३३) । ११६=आत्म श्लोक १०५ (पृ० २२०)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानिनामुपरताखिलरागद्वेषविभ्रमविमोहविकल्पात् ।
तत् कुतो भवति बन्धनमेषां कर्मणस्तदनुयायि तदस्ति ॥११७॥

किमन्धा धावन्ति ध्वनिजनितविज्ञानविलसद्-
विकल्पैराकल्पं चिरपरिचिते कर्मणि रताः ।
इदानीमासाद्य प्रसभसहजव्यक्तिममलां
कुरुध्वं नैष्कर्म्याध्वनि विचरणं नित्यशरणम् ॥११८॥

भोक्ता भुञ्जन्नैव कुर्वन्न कर्ता
कर्माधीनापायतो नास्ति कर्म ।
ज्ञानी जानन्नात्मविज्ञानमात्रं
कर्ता भोक्ता तत्फलस्यास्ति नो वा ॥११९॥

व्यवहारनयावलम्बिनामिह निश्चायकरूपनिश्चयः ।
यदिदं निरुपाधिविग्रहे व्यवहारात्मनि तिष्ठतेऽधुना ॥१२०॥

केचिन्मोहनिरङ्कुशोद्धतधिया मत्ता इवाहंयवः ।
स्वं सद्दृष्टितया स्तुवन्ति सततं के ते वराकाः परे ।
तेषामुद्गतदृष्टिमोहविरसोद्गारादतः केवलं
तेऽन्तस्तत्त्वविचारशून्यहृदयाः सम्यक्त्वतत्त्वच्युताः ॥१२१॥

किल निरर्गलतापि मता न च
स्फुरितशुद्धदशामपवादतः ।
विदितलौकिक एव तदुत्तरं
स्पृशति नान्यतमः कतमोऽधमः ॥१२२॥

संन्यस्ते सर्वकर्मण्युपरतविकलज्ञानमिथ्यान्धकारे
प्रभ्रष्टे दुष्टचेष्टाकुलिततरलिते विभ्रमे संभ्रमेण ।
उद्भिन्नं शुद्धधामाद्भुतचकितचमत्कारकारिप्रभान्त-
र्व्यक्तिप्राग्भारभारोद्गतसहजरसोन्मज्जदुद्रुच्छदच्छम् ॥१२३॥

११७=आत्म श्लोक १२४-१२५ (पृ० २५०)।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सद्दृष्टेः खलु मङ्गलाय मरणं प्राक्कर्मणः शातनात्
यद् गत्यन्तरसङ्क्रमेण पुरतो वेद्यं तदत्रैव हि ।
तस्मान्मे परमात्मनः परतरा संशुद्धिरस्तु स्वयं
न स्यादामघटस्य किं हुतभुजः पाकोऽर्थसंसिद्धये ॥१२४॥

अथ कथं कथमप्यवतारिते
सहजभूमिमितः परमात्मनि ।
पुनरनेकनयाङ्कितलक्षणं
किमपि तस्य मनागपि चिन्त्यते ॥१२५॥

दिव्यज्ञानानन्दकन्दायमानं
शुद्धात्मानं चिच्चमत्कारमात्रम् ।
पश्यन्त्यन्तर्ज्योतिरुद्गच्छदच्छं
ध्याता ध्येयं वस्तु वस्तुस्वरूपम् ॥१२६॥

चैतन्यसामान्यनिमग्नधर्मा-
धिष्ठातृकं द्रव्यमनन्तशक्ति ।
प्रमाणपूर्वानुभवप्रमीय-
माणं स्वसंवेद्यरहस्यगम्यम् ॥१२७॥

यद्येकान्तनयावलम्बनपरज्ञानेन वस्तुस्थितिः
प्रस्तूयेत तदा न वस्तु परतो भिन्नं परिच्छिद्यते ।
स्याद्वादेन पुनः प्रमाणयति यः स्वां वस्तुवृत्तिं स्वतो
ज्ञानीभूय न मुह्यति स्वपरतो भेदादतः स्तूयते ॥१२८॥

चिन्मात्रं पटमात्रवत् तदखिलं द्रव्यार्थिकन्यायतः
पर्यायार्थनयेन तन्तुमितिवद् दृग्ज्ञानमात्रं स्फुरत् ।
स्यादस्तित्वनयादयोमयधनुर्ज्यावर्तिलक्ष्योन्मुख-
स्वस्थाजिह्मगवद्यदस्ति निजद्रव्यादिसम्पत्तितः ॥१२९॥

स्यान्नास्तित्वनयादनायसधनुर्ज्यावर्त्यलक्ष्योन्मुखा-
स्वस्थाजिह्मगवन्न चास्ति परतो द्रव्यादिभिर्नास्तिवत् ।
तद्वद् द्वैतनयक्रमान्निजपरद्रव्यादिभिर्द्वैतवत्
तस्त्वावाच्यनयेन पूर्वशरवद् वाच्यं न चैकक्षणम् ॥१३०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्तित्वावाच्यवृत्त्या प्रथमविशिखवद् द्वैतविद्वेषु वद्वा
स्वद्रव्यक्षेत्रकालादिभिरपरनिजद्रव्यभावादिभिर्वा ।
सद्वाऽवक्तव्यमेतद् युगपदपि परस्वान्यताद्रव्यतार्थै-
र्नास्तित्वाजिह्मगस्थद्वितयविशिखवन्नास्त्यवक्तव्यमेतत् ॥१३१॥

अस्तित्वनास्त्यवक्तव्यनयेन त्रिविधेषु यत् ।
सदसद् यदवक्तव्यं स्वपरस्वान्यकल्पितैः ॥१३२॥

शिशुकुमारजरत्पुरुषैक्यवत्
कृतविकल्पनयात् सविकल्पकम् ।
यदविकल्पनयादविकल्पकं
पुरुषमात्रवदेव तदस्मि चित् ॥१३३॥

सकलशब्दविमर्शितदात्मवत्
तदपि नाम नयेन विमृश्यते ।
तदितरेण तदङ्कितमूर्तिवत्
सकलपुद्गलतामवलम्बते ॥१३४॥

द्रव्याद् भूतभविष्यद्वदिहैष्यदतीतपर्ययोद्भासि ।
भावनयात् पुरुषायिततत्परयोषित्त्वपर्ययोल्लासि ॥१३५॥

सामान्यनयाधीनं हारस्रग्दामसूत्रवद् व्यापि ।
सविशेषनयात् केवलमुक्ताफलवद् यदव्यापि ॥१३६॥

नित्यनयेन सुशिक्षित-
नटवदवस्थायि निश्चले महसि ।
अनवस्थायि निरन्तर-
मनित्यतो रामरावणवत् ॥१३७॥

विस्फारिताक्षचक्षुर्वत्
सर्वगतेन सर्ववर्ति महः ।
विनिमीलिताक्षचक्षुर्वद्
असर्वगतेन चात्मवर्ति परम् ॥१३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शून्यागारवदेकं ननु
शून्यनयेन केवलोद्भासि ।
इतरेण लोकसंयुत-
नौकावत् संयुतोद्भासि ॥१३९॥

ज्ञानज्ञेयविकल्पिताद् द्वयनयात् प्राग्भारभूतेन्धना-
कारान्तर्गतधूमकेतुवदतीवैकं ततश्चिन्महः ।
तत्तद् द्वैतनयात् परप्रतिमया संपृक्तवद् दर्पणोऽ-
नेकं चिद्गुणगुम्फितान्वयमणिप्रालम्बमालम्बते ॥१४०॥

नियतिनियमितौष्ण्यवह्निवद्
यन्नियतिनयान्नियतस्वभावभासि ।
अनियतनिरतस्वभावभासि
ह्यनियमितौष्ण्यपयोवदुत्तरेण ॥१४१॥

संस्कारानर्थक्यं स्वभावतो निशिततीक्ष्णकण्टकवत् ।
तत् सार्थक्यकृदपरादयसा संस्कारितेषुवत्तीक्ष्णम् ॥१४२॥
यत् तत्कालनयान्निदाघदिवसैः सम्पच्यमानाम्रवत्
कालायत्तनितान्तसिद्धिरभितस्त्वाकालिकन्यायतः ।
यद्वा कृत्रिमितोष्मयत्नविधिभिः सम्पच्यमानाम्रवत्
सद्द्रव्ये घटते नितान्तसमयानायत्तसिद्धिर्ध्रुवम् ॥१४३॥

न्यायात् पौरुषवादिनः समुपलब्धा यत्नसाध्या यतः
सिद्धिस्तन्मधुकुक्कुटीव पुरुषत्वाद् दैवनीतेः पुनः ।
तद्दत्ता मधुकुक्कुटी तदुदरे माणिक्यलब्धिर्वशाद्
दैवस्येति च साध्यसिद्धिरभवत् तद्वत् प्रयत्नादृते ॥१४४॥

ईश्वरनयेन धात्र्या हठादिवाश्लिष्टपान्थबालकवत् ।
तत्पारतन्त्र्यभोक्तृप्रतिफलितमतन्त्रतः स्वस्य ॥१४५॥

स्वच्छन्दवृत्तिदारितकुरङ्गकण्ठीरवोक्तिवज्ज्योतिः ।
स्वातन्त्र्यभोक्तृ परमं निर्द्वन्द्वमनीश्वरनयेन ॥१४६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदुपाध्यायेन गुणग्राहीति विनीयमानबालकवत् ।
तद्गुणिनयादितरतस्तद्बालाध्यक्षवत् साक्षि ॥१४७॥

कर्तृनयेन रजकवद् रागादिविभावभावताकर्तृ ।
निजकर्म कृरजकाध्यक्षवदितरेण केवलं साक्षि ॥१४८॥

भोक्तृनयादहितहितान्नभोक्तृ रोगीव दुःखसुखभोक्तृ ।
इतरेण रोगपीडितचिकित्सिताध्यक्षवैद्यवत् साक्षि ॥१४९॥

स्थाणुभिन्नशिरोजातदृष्टिलब्धघनान्धवत् ।
क्रियानयादनुष्ठानसाध्यसिद्धिर्निरन्तरम् ॥१५०॥

ज्ञानेन चणकमुष्टिक्रीतश्चिन्तामणिः स्वगृहकोणे ।
वाणिज्यवद् विवेकप्रधानता साध्यसिद्धिरस्य मता ॥१५१॥

द्वैताद्वैतानुवर्तिव्यवहरणनयाद् बन्धकाबन्धकाणु-
प्रायोग्याण्वन्तरान्तप्रचलदणुकवद् बन्धमोक्षस्य भावात् ।
स्याद्द्वैतानुवर्तिद्वितयगुणयुतत्वाणुतावद् विशुद्धं
सातत्यं बन्धमोक्षद्वयपथपथिकः केवलं निश्चयेन ॥१५२॥

अशुद्धनयतो भवद्घटशरावमृण्मात्रवद्
विशिष्टतरकारणाद् भवति तच्च सोपाधिमत् ।
विशुद्धनयतो न यद् गतविशेषमृण्मात्रवत्
स्वभावनिरुपाधिमज्जयति निर्गतान्तर्महः ॥१५३॥

प्रत्येकान्तधर्मस्फुरितनयगणानन्तताचिन्त्यमानं
क्षीरोदान्तर्निमज्जद्धवलमधवलं यामुनं गाङ्गमम्भः ।
अन्योन्यत्वाविरोधस्फुरितनयलसद्धर्ममात्रेण तद्वद्
द्रव्यं द्रव्यैकधर्मादविवृतमचलामेचकाच्छस्वभावैः ॥१५४॥

युगपदखिलधर्मव्यापकानन्तनीति-
स्फुरितसमयसम्यग्ज्ञानविज्ञायमानम् ।
यदि सकलसरिद्वाःपूरपूर्णैकवार्द्धे-
रविवृतवदिव स्याद्वादतो मेचकं तत् ॥१५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसंसारनिपीतमोहमदिराघूर्णायमाणश्चिति
क्षुभ्यन्नभ्युदयत्यनात्मकबहिर्द्रव्यस्फुरद्व्यक्तिषु ।
रागद्वेषबहिर्मुखस्य नियतं शुद्धात्मसंचेतना-
वाप्तिस्तस्य दवीयसी किमपरैर्व्यर्थालकोलाहलैः ॥१५६॥

चेदुच्चण्डितकर्मकाण्डविगमोच्चण्डीकृताखण्डित-
ज्ञानाडम्बरकाण्डकेन परतां वध्यैकभूमिं नयत् ।
तद्विज्ञानघनाविभिन्नमहिमव्यक्तीकृतान्तर्लसत्
कल्लोलाब्धिरिव स्वभावभवने तिष्ठेत निर्व्याकुलः ॥१५७॥

अन्तर्मुखः समवरुद्धसमस्तमोह-
द्रोहः समेत्य पदवीमपदाधिरूढाम् ।
अच्छोच्छलद्बहुलपुष्कलरङ्गसङ्ग-
रङ्गत्तरङ्गमकराकरवन्ममज्ज ॥१५८॥

कुतश्चिदनुमानतः स्फुरति मेचकव्यक्तितां
प्रमाणभवनात् कुतो भवदमेचकत्वं ततः ।
द्वयानुभवतः क्वचिल्लसति मेचकामेचकं
न किञ्चिदपि किञ्चिदुच्चकचकायमानं महः ॥१५९॥

जयति जयपताकीकृत्य नित्यावबोधं
स्वरसविसरमञ्जच्चिच्चमत्कारसारम् ।
अनुभवभवभावाभावभावप्रवृत्तो
जगदजगदिवान्तर्यस्य नश्यत्यवश्यम् ॥१६०॥

यः पाण्डित्यशिखण्डिपण्डितशिखाशेषे शिखण्डायते
यो विज्ञानघनाघनाध्वनि तडिद्दण्डायते विस्फुरन् ।
उत्क्रामन्नयचक्रसाधनविधौ यश्चक्रवर्ती विभुः
व्याख्यातुं स किल प्रगल्भकुशलः **श्रीज्ञानचन्द्रोदयम्** ॥१६१॥

ब्रह्मज्ञानकलाविलासविलसद्ब्रह्मैकसंलीनता-
लीनं दुर्धरधारया न सहते द्वैतं चिदञ्चत्त्विषा ।
ब्रह्म ब्रह्मणि मग्नमित्थमधुना गम्भीरबोधाम्बुधौ
शब्दब्रह्म कुतश्चकास्ति परमब्रह्मण्यतीतं ततः ॥१६२॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

निष्क्रान्तः शब्दब्रह्मविलासः । तन्निष्क्रान्तौ सर्वे निष्क्रान्ताः । केवलं परब्रह्मैवावस्थितमविकलचिदानन्दमन्दिरमिति पूर्णम् ।

आनन्दोदयपर्वतैकतरणेरानन्दमेरोर्गुरोः
शिष्यः पण्डितमौलिमण्डनमणिः श्रीपद्ममेरुर्गुरुः ।
तच्छिष्योत्तमपद्मसुन्दरमुनिः सूत्रार्थसंदर्भतो
व्यायोगं रचयांचकार किमपि **श्रीज्ञानचन्द्रोदयम्** ॥१६३॥

इति श्रीज्ञानचन्द्रोदयनाटके परमात्मविवरणे पञ्चमोऽङ्कः पूर्णः ।
तत्समाप्तौ च श्रीज्ञानचन्द्रोदयनाटकं परिपूर्णम् ॥श्री॥ मेघालिखितं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ज्ञानचन्द्रोदयनाटकश्लोकानुक्रमः


अज्ञानप्रविजृम्भणेन तमसा ५.९९

अञ्जनपूर्णसमुद्गकतुल्यः ५.६७

अतः प्रत्यग्बन्धात् २.३८

अथ कथं कथमप्यवतारिते ५.१२५

अथ स्यादसदुत्पादः ४.५१

अधिकरणकर्तृकरणैः ४.२१

अनादिनिधनद्रव्यम् ४.२९.

अनादिनिधनं धनं २.२४

अनारब्धास्तब्ध ४.६

अनुपमरसमग्न २.१५

अनुसमयमनन्तधाम २.१०

अन्तरेण मनसा २.३

अन्तर्मुखः समवरुद्ध २.१५८

अन्तस्तत्त्वविवेचनेन ५.५९

अन्योन्यसंवलित ४.४३

अब्ज्योतिर्मरुताम् ५.१२

अभिन्नांशाविभागैक ५.२४

अभ्यस्यतामुपरता १.३२

अर्थास्तद्गुणपर्यया: ३.१४

अर्हतां ध्वनिरनुद्धतमेकः २.४

अवतरतिहृदयभूमिं ४.५९

अविकलचिदानन्दैकान्त १.२

अशुद्धनयतो भवद् घट ५.१५३

अशुभशुभनिशुम्भाय ३.२२

असंहरणिरेव स्यात् ४.५३

अस्तित्वनास्त्यवक्तव्य ५.१३२

अस्तित्वं तावदुत्पाद ५.४१

अस्तित्वं हि सतोऽसतो न ४.२२

अस्तित्वावाच्यवृत्त्या ५.१३१

अहमिदमस्मि ममेदं ५.८०

अहह ! विविधबन्धोपाधि ४.१०१

आकाशस्य प्रदेशानाम् ५.२१

आकाशस्यावकाशो गतिरिति ५.१५

आकाशादिसमग्रलोकम् ५.५४

आत्मज्ञानविजृम्भिता ३.२२

आत्मव्यञ्जकशब्द ५.९४

आत्मा कर्ता स्वस्वभावस्य ५.८१

आत्मा कर्ममलीमसः ४.९३

आत्मा ज्ञानमतो १.२८

आत्माऽऽत्मानमिहाऽऽत्मना १.१६

आत्मा यद्युपयोगवानथ ५.६०

आद्यश्चेदङ्गुलेः क्षेत्रं ५.२५

आनन्दामृतपूरपूर्णजलधि ४.११४

आनन्दोदयपर्वतैक ५.१६३

आसंसारनिपीतमोहमदिरा ५.१५६

आसंसारभवद्रव्य ४.९४

आस्तामस्तसमस्तवस्तु ३.२५

इति तत्त्वार्थविज्ञानं ४.११३

इत्थमुत्थितनिरञ्जन २.२४

इत्थं ब्रह्म सनातन ३.१५

इत्थं वितत्य २.३९

इत्थं शुद्धनयोद्धतध्वजपटः ५.८९

इत्येवं नयसङ्ग्रहग्रह ४.८७

इदमेकान्तविश्रान्त ३.८

इदमेवात्र तात्पर्यं ५.५८

इदानीमुन्मज्जत ४.१०४

ईश्वरनयेन धात्र्या ५.१४५

उच्छेदः संविदादीनां ४.५४

उच्छेद्याविद्यविद्याम् ४.११२

उत्कीर्णलिखितकीलित ५.९२

उत्तरप्राक्तनानां च ४.६२

उत्तरीयमिदं शुभ्रं ४.३७

उत्तरोत्तरव्यतिरेक ४.५७

उत्पत्तिर्यदोत्पाद ५.४४

उत्पत्तिस्थितिभेद ५.५

उत्पादस्थितिभङ्ग ४.५८

उत्पादादुत्तरांशानाम् ५.४५

उदितमुदितमुच्चैः १.४८



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उदेति क्षणभङ्गस्तु ५.४८
उद्धतध्वान्तविध्वंसि ३.३१
उद्धतमोहतमोहननार्कः ५.११२
उद्भिन्नानन्तशुद्धि २.१६
उद्यरसान्द्रसुधासुधांशु ३.९
उन्मज्जत्क्षीरसिन्धु ३.११
उन्मूल्याचूलमूलाम् ३.२८
उपचारात् क्रिया कर्म ४.९६
उपात्तमलिनावस्थं ४.८
एकमेवावबोद्धव्य ४.२४
एकः शुद्धनयेन ४.६५
एकः संविन्मात्रभावोऽहं ४.१११
एकाग्रोन्मुखभावना ४.१०८
एकेनैव प्रदेशेन ५.५१
एकोत्तराद्यनन्तावसान ५.६५
एवमस्य परमात्मनो ४.१०७
कथञ्चिद् द्रव्येषु ५.१
कमभिलषति नैव १.११
करणोपपन्नमिदमक्षसुखं २.२७
कर्तृनयेन रजकवत् ५.१४८
कर्म कर्मणि लसत्यपि ५.१०५
कश्चिज्जातु न जायते ४.९१
काकाक्षितारक २.१९
कादाचित्कतया चकास्ति ५.११
कादाचित्कत्वान्न पर्यायो ४.३०
कादाचित्कपरीणाम ५.१३
किमन्धा धावन्ति ५.११८
किल निर्गलतापि मता ५.१२२
कुतश्चिदनुमानतः स्फुरति ५.१५९
कुसुमितवनराजी १.२१
केचिन्मोहनिरंकुशोद्धत ५.१२१
कोटिद्वयाधिरूढस्य ४.६१
क्रमगतमथवा चेत् २.११
क्रिया फलवती यदि ४.८९
क्वचिद् विशददर्शनं २.२५
गगनेन्दीवरादीनाम् ४.५२
गुणैर्विस्तारसामान्यै ४.११
घटाकाशपटाकाश ३.२६
चक्षूरूपमसंस्पृशन्न १.२९
चिदानन्दस्पन्द ३.४
चिद्वतरङ्गतरङ्गितरङ्ग ५.११३
चिद्विवर्तितनिवर्तित ५.१०८
चिन्मात्रं पटमात्रवत् ५.१२९
चेदुच्चण्डितकर्मकाण्ड ५.१५७
चेद् द्वितीयोऽविभागैकद्रव्य ५.२६
चेद् वृत्त्यंशस्य तौ ५.३३
चैतन्यसामान्यनिमग्न ५.१२७
जयति जयपताकीकृत्य ५.१६०
जलायुकास्तृष्णा २.३५
जागर्ति ज्वलति १.४७
जाताजातमतन्द्रितं १.४१
जानन्तोऽपि न जानन्ति ५.९८
जीवदिन्द्रियपरत्व २.२९
जीवपरिणाममात्रं ५.६८
जीवस्यानादिकर्मप्रचय ४.८८
जीवा निजपरिस्पन्द ५.७
जीवो मूर्तः ५.१७
ज्ञप्तिगुप्तिपरिवर्तित ५.१०९
ज्ञातृज्ञेयपरत्वतत्त्वविलसत् ५.९७
ज्ञानज्योतिः स्फुरति ५.९५
ज्ञानज्ञेयविकल्पात् ५.१४०
ज्ञानमस्ति विदि ५.१०६
ज्ञानाद्यतिरिच्यते १.२६
ज्ञानिनामपि महानिह ५.१०७
ज्ञानिनामुपरताखिल ५.११७
ज्ञानिनां ज्ञानकर्ता ५.१०१
ज्ञानेन चणकमुष्टिक्रीतः ५.१५१
ज्ञेयज्ञानज्ञायकैकान्त १.४४
ज्ञेयाकारविवेचनक्षममिति १.२७
ज्ञेयानन्त्योपदर्शि १.२५
ज्ञेयालम्बिज्ञानभावेन १.३७
ततः प्रदेशमात्रं हि ५.५०

ततोऽस्तु शब्दः पर्यायः ५.१४
तत् तिर्यक्प्रचयस्योर्ध्व ५.५३
तत्त्वविप्लवभयादिह ५.४९
तत्राकाशादिपञ्चानां ५.२९
तत्स्वभावपरभावविभावैः २.६
तत्स्वरूपमुपादाय ४.१८
तथा बहूनां द्रव्याणां ४.२७
तथाविधस्वरूपस्य ४.१०
तदायतविशेषात्म ४.१२
तदेव सकलज्ञानम् २.१३
तद्दुग्धाध्युषिताभिभूय १.३०
तद्द्रव्यगुणपर्यायकर्तृ ३.७
तद्द्रव्यगुणपर्यायभेदानां ४.१५
तन्तुत्वेन पटः ४.२
तस्मादात्मा परिणमति ४.९७
तारतरामलमोहविलासः ५.१११
तावद्वैरं रचयतुतरां ३.५
तेषामस्तित्वमस्त्येक ४.१६
त्रिकोटिस्पर्शस्तूर्ध्व ५.३०
त्वमेव चरणं ५.९६
दण्डभृद्दण्डचक्राद्या ४.६०
दिव्यज्ञानानन्दकन्दायमानं ५.१२६
देहान्तरसंक्रमणं जायन्ते ५.६९
द्रव्यप्रत्ययसन्ततेरवतरन् २.२
द्रव्यस्यैकस्य तु व्योम्नो ५.२७
द्रव्यं तद् व्ययमानमत्र ४.७
द्रव्यं तन्न गुणो ४.७०
द्रव्यं तावदनुज्झदन्वयमयीं ४.७९
द्रव्यं द्रव्यतया चकास्ति १.१७
द्रव्यं निजस्वभावे सत् ४.३९
द्रव्यं स्वभावतः सिद्धं ४.३१
द्रव्याद् भूतभविष्यद्वदिह ५.१३५
द्रव्यार्थादेशतस्तस्मात् ४.७८
द्विचतुर्गुणयोरुभयोः ५.६६
द्वैतभावमपहाय निश्चल १.३५
द्वैताद्वैतानुवर्ति ५.१५२
धर्मात्माऽयमनीदृशं १.१०
धर्माधर्माकाश ५.३
ध्रौव्योत्पादव्ययानां यत् ४.२०
न च खलु मम सौख्यं ४.१०३
न चाङ्गदादिपर्याया ४.७४
न चाप्ययुतसिद्धत्वे ४.३३
न जातु गुणपर्यायौ ४.७२
न द्रव्यं खलु पर्ययानुभवनात् ४.७५
न द्वितीयोऽस्ति वृत्त्यंशः ५.३४
ननु परिणामाद् बन्धः ५.७७
न मनो नाहं देहो ५.६२
नमः सदसद्व्यक्त १.१
न वृत्तिः कैवल्यैवापि ५.४३
न स्यात् सद् द्वितयी गतिः ४.६६
नात्मानुभूतिमपहाय १.३१
नामर्त्यः खलु मर्त्यताम् ४.८१
नार्थः स्वामपहाय १.९
नाशुभं शुभमुरीकरवाम २.३३
नाहं परेषां ५.८७
नित्यनयेन सुशिक्षित ५.१३७
नियता न पुनर्भवं भावित्री ३.२४
नियतिनियमितौष्ण्य ५.१४१
निरुपमरसोद्गारस्तावत् १.५
निरुपमसुखम् ४.११०
निर्भिद्योद्धतबन्धपद्धति १.१३
निर्विकारनिजाधीन ३.२७
निशिततरवारिधारा ३.१६
निश्चिन्वन्नहमात्मसात् ३.१९
निष्कषायमिव नाम्बरं ५.८४
निस्तरङ्गनिजरङ्गसङ्गम १.२३
न्यायात् पौरुषवादिनः ५.१४४
पटे शुक्ले वर्णाः १.३९
पदार्थः समयः स स्यात् ५.३०
पदार्थानां ज्ञानं ४.९८
परपरिणतिजन्यात् २.२१
परमसहजानन्दोन्मज्जत् १.४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परमाणुप्रदेशः प्रदेशमात्रः ५ ६४
परमानन्दनिस्यन्द १.१४
परस्परमसंभवद् भवति ५.१६
परिच्छिनत्त्यविच्छिन्न ३.१७
परिच्छिन्दन्नन्तः ३.२१
परिच्छेत्ता मृग्यः १.३६
परिच्छेद्यं यद्वा २ १
परिणमति न चार्थान् २.१४
परिणमयिता यो यस्यास्ति ५.८२
परिणामोऽपि द्विविधः ५.७८
परोक्षज्ञानमक्षाणाम् २.२०
पर्यायदुर्ललितवृत्तिः ४.८०
पर्यायाद्यनवस्थितोऽपि ४.९२
पर्यायोऽयं तस्य ५.२०
पिपासितो इतस्ततो २.२८
पीतादिगुणरूपैस्तु ४.१७
पुण्यापुण्यमितिद्वयं च ५ ११६
पुद्गलकाया जीवप्रदेशकेषु ५ ७१
पुद्गलमयो न चाहं ५.६३
प्रत्यक्षादिप्रमाणात् ३.९२
प्रत्येकान्तधर्मस्फुरित ५.१५४
प्रदेशप्रचयस्तिर्यक् ५.२८
प्रध्वस्तान्धतमः १.२०
प्रलीनानुत्पन्नान् १.४२
प्रवर्ते शुद्धात्मन्यनवरत ५.९१
प्रवाहक्रमसंवृत्ताः ४.४१
प्रविभक्तप्रदेशत्वं ४.६७
प्राकारत्रयनिर्जितोर्जित १.२२
प्राग्बन्धाभिनिबद्ध २.३१
प्राग्वैचित्र्यकृतप्रपञ्चरचना ४.२३
प्राणैर्जीवति यस्तु ५.५५
प्रादुर्भावमनाद्यनन्तमसकृत् ४.७३
प्रोद्भूतं स्वयमुच्छलत् २.२२
बध्यते रागपरिणत एव ५.७६
विभ्रच्छुभ्रतरङ्गरङ्गितलपत् ३.३२
ब्रह्मज्ञानकलाविलास ५.१६२
भवति यदपि सत्ता ४.६८
भिन्नाभिन्नाभाव ५.४
भूतैर्भाविभवद्भिरभ्युपगतं ५ ९३
भोक्ता भुञ्जन्नेव ५.११९
भोक्तृनयादहितहितान्न ५.१४९
मग्नास्ते कर्ममूढाशयविवश ५.११५
मलिनावस्थया तच्च ४.९
मुक्ताप्रालम्बलम्बि ४.४४
मूर्तः पुद्गल एव ५.९
मूर्तः पुद्गलसाहचर्यवशतो २.१७
मूर्तं पुद्गलजन्यम् ५.१०
मूर्ता निजपरिस्पन्द ५ ६
मूर्तामूर्तं सप्रदेशाप्रदेशं १.४५
मूलसाधनताभूतेः ४.१९
मृत्तिकाया यदस्थानि ४.५५
मोहादिप्रसगद्विभावकलुष ५.५६
यतो वृत्तिमतोऽभावः ५.४२
यत्कर्ममलमालिन्य ५.५७
यत् तत्कालनयान्निदाघ ५.१४३
यत्र प्रमाणनयदुर्नय ५.१४०
यत्रान्वयान्वयविशेषण ३.३
यत्रोन्मज्जति भेदविभ्रमभर ४.३८
यथा द्रव्यस्य विष्कम्भ ४.४०
यथाऽनोकहरूपाणाम् ४.२६
यदशुद्धनयाधीनद्रव्यं ५.८६
यदि भेदं निबध्नाति ४.३४
यदुच्चकास्ति नानात्वम् ४ २८
यदुपाध्यायेन गुणग्राहीति ५.१४७
यद्धाराधरतोयसिक्त ५.८३
यद्यभीष्टमनभीष्टमनिष्टं २.३०
यद्ययं शुभतदुत्तरभावान् २.५
यद्यंशा न स्युरित्थं ५ ३३
यद्येकान्तनयावलम्बनपर ५.१२८
यद्येवं न तदा किमस्ति ४.२५
यः पाण्डित्यशिखण्डिपण्डित ५.१६१
यं कर्तारमथो मिथोऽपि करणं ४.१००

या ते मृदः स्थितिः ४.४९
यावन्नाम गुणादिपर्यय ४.९०
युगपज्जगदप्यसङ्ख्य २.९
युगपदखिलधर्म ५.१५५
युगपदखिललोकालोक २.१२
ये चैकान्तनिरर्गलोच्छलत् ४.३
येन जातमनुजादिभवत्वं ४.८२
येऽनेकान्तविजृम्भितप्रकटित ४ ४
ये बाह्यार्थपरिग्रह १.४९
यैः सामान्यविशेषजन्यविधिना ४.८३
योऽभिव्याप्तो येन ५.१९
यो मुक्त्वा नयपक्षपातम् ५.१०३
यो मृत्पिण्डस्य संहारः ४.४७
या कुम्भ-पिण्डयोः सर्गे ४.४८
रसरूपगन्धवर्जितम् ५.७०
रागद्वेषद्वयदृढतर ३.१०
रागद्वेषद्वयभ्रान्ति ३.६
रागद्वेषमुदस्य दस्युयुगलं ५.९०
रागद्वेषविजृम्भित ५.७३
रागद्वेषोन्मेषनिःशेष ४.५
रूपातीतनिरञ्जनपरमात्मा ५.७१
लिङ्गानीह गुणास्तदाश्रय ५.८
वर्धमानमृदोऽन्तःस्था ४.६३
वल्गत्युद्दामधाम १.४६
विकल्पगहनभ्रान्त ५.११०
विज्ञानघनमात्मानम् ३.३३
विज्ञानजनिताः सर्वे ५.१०२
विज्ञानेनोष्णत्वम् ५.१००
विभागः संभवत्येव ५.५२
विभावधर्मवैधर्म्यात् ४.१४
विरोधिबन्धविध्वंस ४.१०५
विशदसहजज्ञानश्रद्धा १.६
विशुद्धमुद्धतैकान्त ३.२९
विस्फारिताक्षचक्षुर्वत् ५.१३८
वृत्त्यंशेषु समस्तेषु ५.३९
व्यतिरेकत्वमापन्ना ४.७७
व्यतिरेकानुकारिण्यो ४.७६
व्यवहरणबलेन १.१२
व्यवहारनयाधीनम् १.७
व्यवहारनयावलम्बिनाम् ५.१२०
व्याप्यव्यापकतापक्ष १.४३
शब्दब्रह्मवितर्कवाक्यरचना १.१३
शब्दब्रह्मविविक्ततत्त्वमचलं ३.१३
शिशुकुमारजरत्पुरुषैक्यवत् ५.१३३
शुद्धज्ञायकभावनिर्भरतया १.१५
शुद्धद्रव्यनिरूपणार्पितदृशा ४.९९
शुद्धद्रव्यविमर्शनेन च ४.६४
शुद्धाकाशोऽनन्तरूपप्रदेशो ५ १८
शुद्धातीन्द्रियबोधमुद्धततर १.१८
शुद्धात्मानमनाद्यनन्तमचलं ५.८८
शुद्धोपयोगिजीवः ५.७२
शुभाशुभोपयोगात्म १.८
शुभ्रो गुणोऽस्ति वस्त्रस्य ४.३६
शून्यागारवदेकं ननु ५.१३९
षड्जीवनिकाया ये ५.७९
सकलपरमब्रह्मण्येकात्मतां १.३
सकलशब्दविमर्शितदात्मवत् ५.१३४
सघनघनघातिकर्म २.२६
सजातीयविजातीय ३.२०
स तस्य तत्र वृत्त्यंशो ५.३६
सति क्षणिकनित्यत्वे ४.५३
स तिर्यक्प्रचयोऽप्यूर्ध्वं ५.५२
सत् स्वतोऽस्ति ४.८६
सत्स्वभावमधितिष्ठति ४.७१
सद्दृष्टे खलु मङ्गलाय ५.१२४
सद्भावोऽस्तीति कालाणोः ५.४०
सपरमपरं शश्वद्बाधा २.३६
समयविशिष्टवृत्ति ५.३१
समयः समयार्थस्य ५.३२
समयस्य पदार्थस्य ५ ३७
समरसरसिकस्य १.१९
समवायेन सत्तायाः ४.३२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्गः कुम्भस्य यस्सैव ४.४६
सर्गे मृगयमाणस्य ४.५०
सर्गः संहृतिमन्तरा ४.४५
सर्वत्र परद्रव्ये मध्यस्थोऽहं ५.६१
सर्वद्रव्यनिवर्तनात् ४.१०९
सर्वं कर्मोशन्ति सर्वज्ञरेवा ५.१०४
सर्वारम्भस्तम्भशोभायमानं ३.२
सर्वावलोकनतया ४.८४
सर्वे ये भाविभूताः १.४०
सर्वैकत्वनिबन्धनं ५.२
सर्वो द्रव्यमयः पदार्थ ४.१
सहजसुधारसलहरी १.२४
सहवृत्तेरभावत्वात् ५.४६
संन्यस्ते सर्वकर्मण्युपरत ५.१२३
संन्यस्यापरभावमात्मगुणताम् ३.१८
संभावितात्मलाभत्वात् ५.४७
संवित्समुच्छलदनल्प १.३८
संस्कारानर्थकयं स्वभावतो ५.१४२
साध्यस्य साधकतमः ५.८५
सामान्यनयाधीनं ५.१३६
सेतरेतरविरोधविधान २.७
सोऽहमिन्द्रपदवी २.३७
स्थाणुभिन्नशिरोजात ५.१५०
स्निग्धादिस्पर्शरसैः ५.७४
स्फुरति विशदज्ञाने ३.११
स्फुरितविशदभेद ३.३२
स्यात् कर्ता परिणामतः ४.९५
स्यादताद्भाविकः शिष्टः ४.३५
स्यादस्त्येव सतः ४.८५
स्यान्नास्तित्वनयात् ५.१३०
स्रग्दाम हार इति ४.६९
स्वच्छन्दवृत्तिदारित ५.१४६
स्वच्छन्दानन्दकन्द २.१८
स्वतन्त्रः कर्ताऽहं ४.१०६
स्वपरस्वोररीकार ३.३०
स्वभावेनाप्यनुत्पन्ना ५.३८
स्वयमयमहमेकः ४.१०२
स्वयमुद्धतधामचित्समुद्रे २.८
स्वरूपास्तित्ववद्भावः ४.१३


Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org